Digitized by eGangotri and Sarayu Trust.
6341.
Price -/12/-

BIBLIOTHECA INDICA:

A

# COLLECTION OF ORIENTAL WORKS

PRATAP SINGH MUSEUM ... SRINAGAR
6008

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 980.




# प्राकृतपैङ्गलम् ।

# 'PRĀKṚITA-PAINGALAM'

EDITED BY
CHANDRA MOHANA GHOSHA, M.B., B.A.
AUTHOR OF "CHHANDAH-SĀRA-SANGRAHAH," A COMPENDIUM
OF SANSKRIT PROSODY.

FASCICULUS V.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,
1901.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

# BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 980.

PRATAP SINGH
6008
INAGA



# प्राकृतपैङ्गलम् ।

# PRĀKṚITA-PAINGALAM

EDITED BY

CHANDRA MOHANA GHOSHA, M.B., B.A.

AUTHOR OF "CHHANDAH-SĀRA-SANGRAHAH," A COMPENDIUM OF SANSKRIT PROSODY.

FASCICULUS V.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET,

1901.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

# LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

## ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

46, GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

*Sanskrit Series.*

| | | | |
|---|---|---|---|
| Advaita Brahma Siddhi, (Text) Fasc. 1-4 @ /6/ each ... | Rs. | 1 | 8 |
| *Agni Purāṇa, (Text) Fasc. 4-14 @ /6/ each ... ... | | 4 | 2 |
| Aitarēya Brāhmaṇa, Vol. I. Fasc. 1-5 and Vol. II, Fasc. 1-5 Vol. III, Fasc 1-5 Vol. IV, Fasc. 1-5 @ /6 ... ... ... | | 7 | 8 |
| Aṇu Bhāṣyam, (Text) Fasc 1-5 @ /6/ each ... ... ... | | 1 | 14 |
| Aphorisms of Sāṇḍilya, English) Fasc. 1 ... ... ... | | 0 | 12 |
| Aṣṭasāhasrikā Prajñāpāramitā, (Text Fasc. 1-6 @ /6/ each ... | | 2 | 4 |
| Açvavaidyaka, (Text Fasc. 1-5 @ /6/ each ... ... ... | | 1 | 14 |
| Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-5; Vol. II. Fasc. 1-5 @ 1/ each ... ... ... ... ... | | 10 | 0 |
| *Bhāmatī, (Text) Fasc. 4-8 @ /6/ each ... ... ... | | 1 | 14 |
| Bhāṭṭa Dīpikā Vol. I, Fasc. 1-2 ... ... ... ... | | 0 | 12 |
| Bṛhaddēvatā (Text) Fasc. 1-4 @ /6/ each ... ... ... | | 1 | 8 |
| Bṛhaddharma Purāṇa, (Text) Fasc. 1-6 @ /6/ each ... ... | | 2 | 4 |
| Catalogue of Sanskrit Books and MSS., Fasc. 1-2 @ 2/ each ... | | 4 | 0 |
| Çatapatha Brāhmaṇa, Fasc. 1-2 ... ... ... ... | | 0 | 12 |
| *Caturvarga Chintāmaṇi Text Vols. II, 1-25; III. Part I, Fasc. 1-18. Part II, Fasc. 1-10 @ /6/ each ... ... ... ... | | 19 | 14 |
| Çlokavartika, (English) Fasc. I ... ... ... ... | | 0 | 12 |
| *Çrauta Sūtra of Āpastamba, (Text) Fasc. 4-15 @ /6/ each ... | | 4 | 8 |
| Ditto Çāṅkhāyana, (Text) Vol I, Fasc. 1-7; Vol. II, Fasc. 1-4, Vol. III, Fasc. 1-4 @ /6/ each ... ... | | 5 | 10 |
| Çri Bhāshyam, (Text) Fasc. 1-3 @ /6/ each ... ... ... | | 1 | 2 |
| Gadadhara Paddhati Kālasāra Vol I. Fasc. 1-2 ... ... ... | | 0 | 12 |
| Kāla Mādhava, (Text) Fasc. 1-4 @ /6/ each ... ... ... | | 1 | 8 |
| Kāla Viveka, Fasc 1-4 ... ... ... ... | | 1 | 8 |
| Katantra, (Text) Fasc. 1-6 @ /12/ each ... ... ... | | 4 | 8 |
| Kathā Sarit Sāgara, English) Fasc. 1-14 @ /12/ each ... ... | | 10 | 8 |
| Kurma Purāṇa, (Text) Fasc. 1-9 @ /6/ each ... ... ... | | 3 | 6 |
| Lalita-Vistara, (English) Fasc. 1-3 @ /12/ each ... ... | | 2 | 4 |
| Madana Pārijāta, (Text) Fasc. 1-11 @ /6/ each... ... ... | | 4 | 2 |
| Mahā-bhāṣya-pradipōdyōta, (Text) Fasc. 1-8 @ /6/ each ... ... | | 3 | 0 |
| Manuṭīkā Saṅgraha, (Text Fasc. 1-3 @ /6/ each ... ... | | 1 | 2 |
| Mārkaṇḍeya Purāṇa, (English) Fasc. 1-6 @ /12/ each ... ... | | 4 | 8 |
| *Mīmāṁsā Darçana, (Text) Fasc. 7-19 @ /6/ each ... ... | | 4 | 14 |
| Nārada Smṛti, (Text Fasc. 1-3 @ /6/ ... ... ... | | 1 | 2 |
| Nyayavārtika, (Text) Fasc. 1-4 @ /6/ ... ... ... | | 1 | 8 |
| *Nirukta. (Text) Vol. III, Fasc. 1-6; Vol. IV, Fasc. 1-8 @ /6/ each ... | | 5 | 4 |
| Nyayabinduṭīka, (Text) ... ... ... ... ... | | 0 | 10 |
| Nyaya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1-6; Vol. II, Fasc. 1-3 @ /6/ each ... ... ... ... ... | | 3 | 6 |
| Padumawati Fasc. 1-3 @ 2/ ... ... ... ... | | 6 | 0 |

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पढम गण बिप्पओ बिहु तह[1] णरेंदओ[2] ।
गुरु सहिअ अंतिणा[3] कमल इम[4] भंतिणा ॥७४॥
जहा, स जअइ[5] जणद्दणा[6] असुर[7]कुल मद्दणा ।
गरुड़[8]बर बाहणा[9] बलि भुअण[10] चाहणा[11] ॥
७५ ॥ कमल

PRATAP SINGH ... SRINAGAR
6008

७४-७५ । पढम[प्रथम]गणो विप्रकः द्वितीयस्तथा नरेन्द्रः । गुरुसहितान्तेन कमलमेवंप्रकारेण ॥ नरेन्द्रो जगणः, भवन्ति-[भन्ति]-शब्दः प्रकारवचनः । उदाहरति । स जयति जनार्द्दनः असुरकुलमर्द्दनः । गरुडवरवाहनः बलिभुवनयाचकः ॥ (C).

७४-७५ । अथाष्टाक्षरचरणवृत्तस्य षण्णवतितमं भेदं कमल-नामकं वृत्तं लक्षयति, पढमेति । जह — यत्र बिप्पओ — विप्रकः चतुर्लघ्वात्मको गण इति यावत् पढम — प्रथमः गणः, गुरु सहिअ अंतिणा — गुरुसहितांतः यस्यांते गुरुरेतादृश इत्यर्थः णरिंदओ — नरेन्द्रः मध्यगुरुर्जगण इति यावत् बिहु — द्वितीयः गण इ[ति] पूर्वेणान्वयः, एम भंतिणा — एवंप्रकारेण कमलनामकं वृत्तं भवतीत्यर्थः ॥ यद्वा अवहट्टभाषायां लिंगविभक्तिवचनव्यत्यासे दोषा-भावात् गुरु सहिअ अंतिणा — गुरुसहितांतम् इति वृत्तविशेषणं

७४—७५ । १ जह (E). २ णरिंदओ (E & F). ३ एंतिणा (A), अंतिआ (C), अंतिण (F). ४ एम (A & F), ए (E). ५ विजअइ (A). ६ जणकुणा (C). ७ असुर (E). ८ गवल (B), गुड (C). ९ वाहया (B). १० भुवण (F). ११ चाअणा (B).



CC-0. In Public Domain. Funding by IKS-MoE

दिट्ठ जोहा गणा तिण्णिआ णाअराएण[1] जा बिण्णिआ[2] ।
मास अद्धेण पाअ ट्ठिअं[3] जाण[4] मुद्धे[5] महालच्छिअं[6] ॥७६॥

---

वाच्यम् । ४१ । कमलमुदाहरति, सेति । [असुसु]र कुल मद्दणा —दैत्यवंशमर्द्दनः गरुड़ वर वाहणा — गरुडः वरं श्रेष्ठं वाहनं यस्य तादृश इत्यर्थः बलि भुवण चाहणा — बलिभुवनं बलिराज्यं जिघृचुरित्यर्थः सः जणद्दणा — जनार्द्दनः जअइ जयति ॥ कमलं निवृत्तम् । ४२ । (E).

७४-७५ । पढेति । प्रथमो गणो विप्रो द्वितीयस्तथा नरेंद्रः । गुरुसहितमंतेन कमलं छंद एम[व]मेवं भक्तिना[त्या] इति रचनया ॥ विप्रश्चतुर्लघुः, नरेंद्रो जगणः । यथा । स जयति जनार्द्दनः असुरकुलमर्द्दनः । गरुडवरवाहनो बलिभुवनजिघृचुः ॥ (G).

७६ । अथ नवाचरम् । दृष्टा योधगणास्त्रयः नागराजेन [ये] वर्णिताः । मासार्द्धेन पादस्थिता जानीहि मुग्धे महालक्ष्मी[रि]यम् ॥ योधो मध्यलघुः पञ्चकलः ऽ।ऽ, मासार्द्धं पञ्चदश तेन पञ्चदशकलः पादो लभ्यते । (C).

७६ । अथ प्रस्तारक्रियया नवाचरस्य द्वादशाधिकं पंचशतं भेदा भवन्ति, तत्राष्ट[सप्त]चत्वारिंशाधिकशततमं भेदं महालक्ष्मीनामकं वृत्तं लक्षयति, दिट्ठेति । जा — ये रगणाः णाअराएण — नागराजेन पिंगलेनेति यावत् बिण्णिआ — विज्ञाता वर्णिता वा,

---

७६ । १ णागराएण (F). २ वण्णिआ (F). ३ पाअ च्छिअं (B & C). ४ जाणु (F). ५ अ (C). ६ महालच्छिअं (E), महालच्छिआ (F).

Digitized by eGangotri and Sarayu Trust.



जहा,

मुंडमाला गला[१] कंठिआ[२] णाअराआ भुआ संठिआ[३]।
बघ्घछाला[४] किआ बासणा चंडिआ पाउ सिंहासणा[५]॥
७७॥ महालच्छी[६]।

---

माष अद्धेण — मासार्द्धेन मासार्द्धपरिमिताभिः पञ्चदशभिर्मात्राभिरित्यर्थः दिट्ठ — दृष्टा उपलक्षिता इति यावत् ते एतादृशाः तिण्णिआ — त्रयः जोहा गणा — योद्धृगणा मध्यलघुरगणा इति यावत् यत्र पाअ — पादे ट्ठिअं — स्थिताः, तां महालच्छिअं — महालक्ष्मीं जाण — जानीहीति॥ अत्र मात्राकथनं श्लोकपूरणार्थमेव। रगणत्रयरचितचरणा महालक्ष्मीरिति तु निष्कृष्टार्थः। ४३। (E).

७६। अथ नवाक्षरं त्रिष्टुप्[वृहती]। दिट्ठेति। दृष्टा योद्धृगणास्त्रयो नागराजेन ये वर्णिताः। मासार्द्धेन पादस्थितां जानीहि मुग्धे महालक्ष्मीं छंदः॥ मासेति पंचदशमात्रपदां। योद्धा रगणः। (G).

७७। [उदाहरति] मुण्डमाला गले कण्ठिका नागराजो-भुजासंस्थितः। व्याघ्रचर्मकृतं वासः चण्डिका पातु सिंहासना॥ कण्ठिका ग्रैवेयकम्। (C).

७७। महालक्ष्मीमुदाहरति, मुण्डेति। मुण्डमाला गला

---

७७। १ गलें (A), dropt in (F). २ कण्ठिआ (C). ३ सण्ठिआ (C). ४ वघ्घछाआ (A), वग्गच्छला (B & C). ५ सीहासणा (B & C). ६ महालच्छी (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**दिअबर कण्णो सअणं पअ पअ[1] मत्ता गणणं ।**
**सर मुणि मत्ता लहिअं सहि सरगिक्का[2] कहिअं ॥७८॥**

---

कंठिआ — मुण्डमालेव गलकंठिका कंठभूषेति यावत् यस्या-स्तादृशीत्यर्थः संठिआ णाअराआ भु[आ] — संस्थितनागराजभुजा । प्राकृते पूर्वनिपातानियमादग्रे वर्त्तमानस्यापि संठिआ-शब्दस्य पूर्व-निपातः । बघ्घछाला किआ वासणा — व्याघ्रचर्मकृतवसना सिंहा-सणा — सिंहारूढ़ा चंडिआ — चंडिका पाउ — पातु ॥ महा-लक्ष्मीर्निवृत्ता । ४४ । (E).

७७ । यथा । मुंडमाला गले कंठिका नागराजभुजयोः संस्थिता । व्याघ्रकृत्तिकृतवसना चंडिका पातु सिंहासना ॥ (G).

७८ । द्विजवरकर्णः सगणः पादे नवमात्रागणनं । शरमुनि-मात्रालब्धा प्रिय सखे सारङ्गिका कथिता ॥ द्विजवरश्चतुर्लघुः, कर्णो द्विगुरुः, मात्रा वर्णः, तेन नव वर्णा लभ्यन्ते । शराः पञ्च, मुनयः सप्त, मिलित्वा द्वादश मात्रा लब्धाः । (C).

७८ । अथ नवाक्षरचरणस्य वृत्तस्य चतुश्चत्वारिंश[अष्टा]धिक-द्विशततमं [२०८] भेदं सारंगिकानामकं वृत्तं लक्षयति, दिअ-बरेति । सहि — हे सखि पअ पअ — पदे पदे दिअबर कण्णो सअणं — द्विजवरकर्णसगणैः, द्विजवरश्चतुर्लघ्वात्मको गणः, कर्णो-गुरुद्वयात्मको गणः, सगणोऽन्तगुरुगणस्तैरित्यर्थः, मत्ता गणणं — मात्रागण[ण]नं यत्र क्रियत इति शेषः, सर मुणि मत्ता लहिअं —

---

७८। १ पअ अव (C). २ सारंगी (A), सरंगिक्का (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

हरिण सरिस्सा[१] णअणा कमल सरिस्सा[२] बअणा ।
जुअजण[३] चित्ता हरिणी[४] पिअ सहि दिठ्ठा[५] तरुणी ॥

७९ ॥ सारंगिका ।

शरसुनिमात्रासाधिता, शराः पंच, मुनयः सप्त, तथाच प्रतिचरणं द्वादशमात्रायुक्तेत्यर्थः, सा सरगिक्का — सारंगिका कहिअं — कथिता ॥ वचनलिङ्गव्यत्यासस्तु प्राकृते न दोषायेति पूर्वमेवोक्तम् । कियतीनां मात्राणां गणनं विधेयमित्यत्र हेतुगर्भं श[स]र मुणीति वृत्तविशेषणम् ! केचित्तु दिअवर कणो — द्विजवरकर्णौ सअणं — सगणः एवंप्रकारेण यत्रेति शेषः मत्ता गणणं — मात्रागणनं क्रियत- इति शेषः, कियंत्यो मात्रा गणनीया इत्यपेक्षायामाह, सरेति, सर मुणि मत्ता — शरमुनिमात्राः, शराः पंच मुनयः सप्त मिलित्वा द्वादशेत्यर्थः लहिअं — लभ्यंते यत्र, सा सहि — हे सखि सारंगिका कहिअं — कथ्यतामिति योजनिकामाहुः । अत्र वर्णवृत्ते मात्राकथनं पादपूरणार्थमेव । द्विजवरकर्णसगणरचितचरणा सारं- गिकेति निष्कृष्टोऽर्थः । ४५ । (E).

७८ । दिअ इति । द्विजवरः कर्णः सगणः पदे पदे मात्रा- गणना । शरमुनिमात्रासहिता सखि सारंगिका कथिता ॥ शराः पंच, मुनयः सप्त । (G).

---

७९ । १ सहस्स (E). २ विलासा (A). ३ जणअण (C). ४ हरणी (A & E). ५ दिट्ठा (B).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



कुंतीपुत्ता[1] जुअ लहिअं तीए[2] बिप्पो धुअ[3] कहिअं ।
अंते हारो जह[4] जणिअं तं पाइत्ता फणि भणिअं[5] ॥ ८० ॥

---

७९ । उदाहरति । हरिणसदृशनयना कमलसदृशवदना । युवजनचित्तहरिणी प्रियसखि दृष्टा तरुणी ॥ युवती उच्चस्तनीत्यर्थः । (C).

७९ । सारंगिकामुदाहरति । हरिणसदृशनयना कमलसदृशवदना । युवजनचित्तहरणी तरुणी हे प्रियसखि दृष्टा ॥ कस्याश्चित्सख्याः कांचिन्निजवयस्यां प्रति वचनमिदम् । सारंगिका निवृत्ता । ४६ । (E).

७९ । यथा । हरिणसदृशनयना कमलसदृशवदना । युवजनचित्ताहरिणी प्रियसखि दृष्टा तरुणी ॥ (G).

८० । कुन्तीपुत्रः कर्णः गुरुयुगलं, तद्युगलेन गुरुचतुष्कं, ततश्चतुर्लघुस्ततो गुरुर्यत्र तत् पावित्रच्छन्दः ॥ (C).

८० । अथ नवाक्षरचरणस्य वृत्तस्यैकचत्वारिंशोत्तरद्विशततमं भेदं पवित्रानामकं वृत्तं लक्षयति, कुंतीपुत्तेति । जह — यत्र प्रथमं कुंतीपुत्ता जुअ लहिअं — कुंतीपुत्रयुगलब्धं प्राप्तमिति यावत् कुन्तीपुत्रस्य कर्णस्य गुरुद्वयात्मकगणस्येति यावत् युगं गुरुचतुष्टयमित्यर्थः, तीए — तृतीये स्थाने कर्णद्वयानंतरमित्यर्थः बिप्पो — विप्रश्चतुर्लघ्वात्मको गणः ध्रुवं निश्चितं कहिअं — कथितः । अंते विप्रांते

---

८० । १ कुन्तीपुत्ता (B). २ तीओ (A & F). ३ धुव (E & F). ४ जइ (B & C), जहि (F). ५ कव्वउ कहिअं (B & C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

फुल्ला णीबा[1] भम भमरा दिट्ठा[2] मेहा जल समला[3] ।
णच्चे बिज्जू[4] पिअ[5] सहिआ आवे कंता कहु[6] कहिआ[7] ॥
८१ ॥ पाइत्ता[8] ।

हारः एकगुर्वात्मको गणः जणिअं—जनितः स्थापित इति यावत्, तं—तां फणि भणिअं—फणिभणितां पाइत्ता—पवित्रां विद्धीति शेषः ॥ गुरुचतुष्टयोत्तरचतुर्लघुकानंतरस्थापितैकगुरुरचित-चरणा पवित्रेति तु निष्कृष्टार्थः । ४७ । (E).

८० । कुंतीति । कुंतीपुत्रयुगलहिता तृतीयो विप्रो ध्रुवं कथितः । अंते हारो यत्र जनितः सा पवित्रा फणिभणिता ॥ गुरुलघुचतुष्टयं गुरुश्चेत्यर्थः । (G).

८१ । उदाहरति । फुल्ला नीपा भ्रमद्भ्रमरा दृश्यन्ते मेघाः जलश्यामलाः । नृत्यति विद्युत् प्रियसखि आयास्यति कान्तः कदा ॥ (C).

८१ । पाइत्ता[पवित्रा]मुदाहरति, फुल्लेति । भम भमरा—भ्रमद्भ्रमराः भ्रमंतः भ्रमरा येषु तादृशा इत्यर्थः णीबा—नीपाः कदंबा इति यावत् फुल्लाः पुष्पिताः, जल समला—जलश्यामलाः मेहा—मेघाः दिट्ठा—[दृष्टाः] । बिज्जू—विद्युत् णच्चे—नृत्यति, अतः हे

८१ । १ णीपा (E). २ दिट्ठा (B & C). ३ समरा (A & B). ४ विज्जा (B), बिज्ज (C). ५ पिम्र (C). ६ सहि (B & C). ७ सहिआ (F). ८ पाइत्ता (C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**सरस[1] गण रमणिआ दिअबर[2] जुअ[3] पलिआ[4] ।**
**गुरु धरिअ पइ पओ दह कलअ कमलओ[5] ॥ ८२ ॥**

---

पिअ सहिआ — हे प्रियसखिके कंता — कांतः कहिआ — कदा आवे — आयास्यति तत्त्वमेवेति शेषः कह — कथय ॥ इदं च प्रोषितभर्तृकायाः कांचिन्निजवयस्यां प्रति वचनम् । पविचा निवृत्ता । ४८ । (E).

८१ । यथा । फुल्ला नीपाः [भ्रमद्]भ्रमरा दृष्टा मेघाः जल समला — जलश्यामलाः । नृत्यति विद्युत् प्रियसखि आयास्यति कांतः कदा कथ्यताम् ॥ (G).

८२ । सरसगणरमणीया प्रकटितद्विजगणद्वया । सगुरुगणा प्रतिपादं दशकला कमला ॥ सरसैरुत्तमगणै रमणीया, के ते गणा इत्यत उक्तं द्विजगणद्वयं गुरुयुक्तं मिलित्वा दश कला भवन्ति । अथवा रसानां लघूनां गणः समूहस्तेन [सह वर्त्तमाना] सरसगणा सा चासौ रमणीया चेति । (C).

८२ । अथ नवाक्षरचरणस्य वृत्तस्य षट्पञ्चाशदधिकद्विशततमं भेदं कमलानामकं वृत्तं लक्षयति, सरसेति । गण सरस — गणश्रेष्ठं रमणिआ — रमणीयं दिअबर जुअ — द्विजवरयुगं द्विजवरश्चतुर्लघ्वात्मको गणस्तस्य युगलं तथा चाष्टौ लघूनिति परमार्थः

---

८२ । १ सुपिअ (A), सरसा (C). २ दिअ गण (A, B & C). ३ दुअ (C). ४ पअलिआ (A), अपिआ (C). ५ देइ कलइ कमलओ (B).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, चल[1] कमल[2] णअणिआ[3] खलिअ[4] थण बसणआ[5] ।
हसइ पर णिअलिआ[6] असइ[7] धुअ[8] बहुलिआ ॥
८३ ॥ कमला ।

---

पलिआ — दत्ता । गुरुरेकः प[द्ध] पओ — प्रतिपादं यत्र धरिअ — धृतः ध्रियते वा दह कलअ — दशकलाकं तत् कमलओ — कमलकं तत्कमलनामकं वृत्तमित्यर्थः ॥ अत्र चान्वयान्यथानुपपत्त्या कृतस्य गण सरस पूरितस्य निपातस्य दोषापहानं नाशङ्कनीयमव[ह]ट-भाषायां तस्य नियमाभावात् । सरस-गण रमणिआ इति च पदद्वयं पद्यपूरणार्थमेवेति द्रष्टव्यम् । ४९ । (E).

८२ । सरेति । सरसगणरमणीयं द्विजवरयुगपतितं । द्विज-वरस्वतुर्लघुः । गुरुर्धृतः प्रतिपदं दशकलाकं कमलम् ॥ (G).

८३ । उदाहरति । चलितचपलनयना स्खलितस्तनवसना । हसति परनिकटे असती ध्रुवं बधूटी ॥ खल्या बधूर्ब्व[धू]टी स्यात् । (C).

८३ । कमलामुदाहरति, चलेति । स्पष्टार्थम्पद्यम् । ५० । (E).

८३ । यथा । चलकमलनयनिका स्खलितस्तनवसना । हसति परनिर्मला लसति ध्रुवं बधूका ॥ (G).

---

८३ । १ Dropt in (B). २ चवल (A), चपल (C). ३ णअणआ (A). ४ खलइ (A, B & C). ५ वसणिआ (B & C). ६ णिअलआ (A), णिआ (B), दूअणिआ (C). ७ लसइ (F). ८ धुव (E).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



रअइ[1] फणि बिंब[2] एसो गुरु जुअल[3] सब्ब सेसो ।
सिरहि[4] दिअ मज्झ[5] राओ गुणह[6] गुणिए सहाओ[7] ॥८४॥

---

८४ । उच्यते फणिराजेनैव गुरुयुगलसर्व्वशेषः । शिरसि द्विजो-मध्ये राजा गुणिण[नः] गण्यतां विम्बभावः ॥ राजा जगणः, गण्यतां ज्ञायतां, विम्बस्य छन्दसः भावः प्रकारः । (C).

८४ । अथ नवाक्षरचरणस्य [वृत्तस्य] षण्णवतितमं भेदं विंब-नामकं वृत्तं लक्षयति, रअईति । सिरहि — सि[शि]रसि पादादा-विति यावत् दिअ — द्विजश्चतुर्लघ्वात्मको गण इत्यर्थः, मज्झ — मध्ये राओ — राजा मध्यगुरुर्जगण इत्यर्थः यत्र पततीति शेषः, गुरु जुवल सब्ब सेसो — गुरुयुगलसर्वशेषं गुरुद्वयं सर्वेषां पादानां शेषे अंते यस्य तादृगित्यर्थः, एसो — एतत् बिंब — विंबं विंबनामकं वृत्तमिति यावत् गुणिए — गुणिनः गुणवतः पुरुषस्य सहाओ — सहायः गुणोपदेष्टृत्वाद्गुणवत्पुरुषस्य सहायभूत इति यावत् फणि — फणी पिंगलः रअइ — रचयति, गुणह — गुणयत हे बुधजना इति शेषः ॥ * * द्वौ गुरू यत्र प्रतिचरणं क्रमेण पततस्तद्विंबनामकं वृत्तमिति फलितार्थः । अथवा सर्व्वशेषे पादांते गुरुयुगलं सि[शि]-रसि द्विजः, विप्रगुरुद्वयमध्ये राजा जगण इत्यर्थः यत्र भवतीति शेषः, फणि रइअ — फणिरचितम् एसो — एतत् विंबं हे गुणि — हे गुणिनः शिष्याः सहाओ — स्वभावादेव गुणह — गुणयत इति

---

८४। १ रइय (A). २ फणि राज (C). ३ जुवल (E). ४ सिरधि (A), सिरइ (B & C). ५ मज्झ (B), ज्झ (C). ६ गणहि (E), गुणइ (C). ७ गुणि विम्ब हाओ (C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

चलइ चल बित्त[1] एसो णसइ तरुणत्त[2] बेसो ।
सुपुरुस[3] गुणेण बड्ढा[4] थिर रहइ कित्ति[5] सुद्धा ॥

८५ ॥ बिंब[6] ।

---

भिन्नं भिन्नं योजनीयं। परे तु गुणिए सहाओ — हे गुणिनः सखाय-इत्यर्थं कृत्वा सखिसंबोधनपरमेतत्पदमिति वदंति । (E).

८४ । रअ इति । रचयति फणी विंबः एष गुरुयुगलसर्वशेषः । शिरसि द्विजो मध्ये राजा गुणय गुणिनां सहायः ॥ द्विजस्तु-र्लघुः, राजा जगणः । (G).

८५ । उदाहरति । चलत्येव वित्तमेतत् नश्यति तरुणत्ववेशः । सुपुरुषगुणेन बद्धा स्थिरा तिष्ठति कीर्त्तिः शुद्धा ॥ (C).

८५ । विंबमुदाहरति, चलइति । एसो — एतत् चल — चञ्चलमाशुगत्वरमिति यावत् बित्त — वित्तं द्रव्यं चलइ — चलति नश्यतीत्यर्थः, तरुणत्त बेसो — तरुणत्ववेषस्तारुण्यावस्थेति यावत् णस[इ] — नश्यति । सुपुरिस गुणेण बढ्ढा — सुपुरुषगुणेन बद्धा शुद्धा स्वच्छा कित्ति — कीर्त्तिः थिर — स्थिरा रहइ — तिष्ठति ॥ तस्मात्सर्वमनित्यं मत्वा गुणानां लंबे पुरुषैरासमुद्रांतव्यापिनी कीर्त्तिर्भवति इति कस्य[चित्] परमाप्तस्य किंचिन्मित्रं प्रत्युपदेशः । विंबं निवृत्तम् । ५२ । (E).

---

८५ । १ चल चित्त (A), चलि चित्त (F). २ तरुणंत (F). ३ सुपुरिस (E & F). ४ पड्ढा (A). ५ कीत्ति (B). ६ बिंबा (B & C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**जसु आइ हत्थ[१] विआण[२] तह[३] बे पओहर जाण।**
**पभणेइ णाअ[४] णरेंद[५] एम[६] माणु[७] तोमर छंद ॥ ८६ ॥**

---

८५। यथा। चलति चलचित्त एष नश्यति तरुणवेषः। सुपुरुषगुणेन बद्धा स्थिरा तिष्ठति कीर्त्तिः शुद्धा ॥ (G).

८६। यस्यादौ हस्तो विज्ञातः तथा द्वौ पयोधरौ [ज्ञातौ]। प्रभणति नागनरेन्द्रः एतत् जानीहि तोमरच्छन्दः ॥ हस्तोऽन्त-गुरुचतुष्कलः। (C).

८६। अथ नवाक्षरचरणस्य वृत्तस्य चतुःषष्ट्युत्तरत्रिशततमं भेदं तोमरनामकं वृत्तं लक्षयति, जस्विति। जसू[सु]—यत्र [आइ]—आदौ हत्थ—हस्तः गुर्वंतः सगण इति यावत् विआण—विज्ञातः विज्ञायते वा, तह—ततस्तथा वा बे पओहर—द्वौ पयोधरौ मध्यगुरुकौ जगणावित्यर्थः जाण—ज्ञायेते ज्ञातौ वा तत् तोमर छंद—तोमरनामकं वृत्तं माणु—मानय, एम—एवं णाउ णरेंद—[नाग]नरेंद्रः पिंगलः पभणेइ—प्रभणति ॥ यत्र प्रथमं सगणस्त-दनंतरं च जगणद्वयं प्रतिचरणं प[त]ति तत्तोमरनामकं वृत्तमि-त्यर्थः। ५३। (E).

८६। जस्विति। यस्यादौ हस्तो विज्ञातः तथा द्वौ पयोधरौ ज्ञातौ। प्रभणति नागनरेंद्रः एवं मानय तोमरं छंदः ॥ हस्तः सगणः, पयोधरो जगणः। (G).

---

८६। १ जसु आइ हच्छ (A), जसू आइ हत्थ (E). २ वेआण (E). ३ तसु (A). ४ णाउ (E & F). ५ णरन्द (C). ६ ए to be read as short, vide श्लोक ४, p. 7. ७ जाण (A & B), माण (C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

चलि[1] चूअ कोइल साब महु[2]मास पंचम गाब ।
मण मज्झ्झ[3] बम्मह[4] ताब ण हु कंत अज्जबि आब ॥

८७ ॥ तोमर ।

---

८७ । चलति चूते कोकिलशावो मधुमासे पञ्चमं गायति । मनोमध्ये मन्मथतापः न हि कान्तोऽद्याप्यायाति ॥ (C).

८७ । तोमरमुदाहरति, चलीति । कोइल साब—कोकिलशावकाः चूअ—चूते सहकारवृक्षे चलि—गता महुमास—मधुमासे वसंतसमये पंचम—पंचमं स्वरभेदं गाब—गायंति। अत इति शेषः मज्झ—मम मण—मनः बम्मह—मन्मथः ताब—तापयति, अज्जबि—अद्यापि कंत—कांतः ण हु—न खलु आब—आगतः ॥ एतादृशेऽपि कांतो नायातोऽतः किमाचरणीयं मया तत्त्वमेवादिशेति गूढ़ाभिप्रायायाः कस्याश्चित् प्रोषितभर्त्तृकायाः प्रियसखीं प्रति वाक्यमिदम् । तोमरं निवृत्तम् । ५४ । (E).

८७ । यथा । गता चूते कोकिलशावो मधुमासे पंचमं गायति । मनो मन्मथस्तापयति न खलु कांतोऽद्याप्यायातः ॥ (G).

---

८७ । १ बलि (A). २ मधु (B & C). ३ मज्झ (B & C). ४ मम्मह (C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



णाआराआ जंपे सारा ए चारी कणा अंते हाराए ।
अट्ठाराहा[1] मत्ता पाआए[2] रूआमाला[3] छंदा[4] जंपीए[5] ॥
८८ ॥

८८ । नागराजो जल्पति सारमेतत् चत्वारः कर्णा अन्ते हारः । अष्टादश मात्रा यत्पादे रूपमालीच्छन्दो जल्प्यताम् ॥ (C).

८८ । अथ नवाक्षरचरणस्य वृत्तस्य प्रथमं भेदं रूपमाला-नामकं वृत्तं लक्षयति, णाआराआ इति । चारी कणा — चत्वारः कर्णा गुरुद्वयात्मका गणा इति यावत् अंते — कर्णचतुष्टयांते हाराए — हारः गुरुरित्यर्थः । एवंप्रकारेण पाआए — पादे अट्ठाराहा — अष्टादश मत्ता — मात्रा यत्र भवंतीति शेषः, ए — एतत् सारा — सारमत्युत्कृष्टमिति यावत् रूआमाला छंदा — रूपमालाच्छंदः जंपाए — जल्प्यते कथ्यत इति यावत्, इति णाआ-राआ — नागराजः पिंगलः जंपे — जल्पति ॥ अत्र सारपदं मात्रा-ज्ञापकस्य चरणः पद्यपूरणार्थमेव वर्णवृत्तेषु मात्राकथनानुपयो-गादिति वाच्यम् । ५५ । (E).

८८ णाआ इति । नागराजो जल्पति सारमेतत् चत्वारः कर्णाः अंते हारः । अष्टादश मात्राः पादे रूपमालाच्छंदो जल्प्यते ॥ (G).

८८ । १ अट्ठाहारो (A), अट्ठाराहा (B & C). २ जा पाए (B & C). ३ रुआमाली (B & C). ४ छंदो (A), छन्दा (B & C). ५ जंपूसे (A), जप्पीए (B), जम्पीए (C), जंपाए (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

जं णच्चे बिज्जू[1] मेहंधारा[2] पंफुल्ला[3] णीबा सद्दे मोरा ।
बाअंता[4] मंदा[5] सीआ बाआ कंपंता गाआ[6] कंता णाआ ॥
८९ ॥ रूपमाला[7] ।

८९ । उदाहरति । [यत्] नृत्यति विद्युत् मेघान्धकाराः प्रफुल्ला नीपाः शब्दायन्ते मयूराः । वीजयन्ति मन्दाः शीता वाताः कम्पते कायः कान्तो नायातः ॥ (C).

८९ । रूपमालामुदाहरति, जमिति । जं—यस्मात् कारणात् बिज्जू—विद्युत् णच्चे—नृत्यति मेहंधारा—मेघांधकारा दिशः जा[ता] इति शेषः, णीबा—नीपाः कदंबाः पंफुल्ला—प्रफुल्लिताः, मोरा—मयूराः सद्दे—शब्दायंते । मंदा—मंदगामिनः सीआ—शीताः बाआ—वाताः बाअंता—वांति, कंता—कांतः णाआ—नागतः, अतः गाआ—गात्रं कंपंता—कंपते ॥ वर्षा-कालमवधिं कृत्वा गतः कांतो नाद्याप्यागतोऽतः किमाचरणीयमिति स्वयमेव विचारं कुर्वंत्याः प्रोषितभर्तृकाया वाक्यमेतत् । रूपमाला निवृत्ता । ५६ । (E).

८९ । यथा । यन्नृत्यति विद्युन्मेघांधकारः प्रफुल्ला नीपाः शब्दायंते मयूराः । वांति मंदाः शीता वाताः कंपते गात्रं कांतो-नायातः ॥ (G).

---

८९ । १ विज्जा (B), वीज्जा (C). २ मेहअन्धारा (B). ३ पप्फुल्ला (B). ४ वीअंता (A), वीअन्ता (B & C). ५ मत्ता (A). ६ काआ (A & C), पाआ (B). ७ रूपमाली (B & C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जसु[१] आइ हत्थ[२] विआणिओ
तह[३] वे पओहर[४] जाणिओ ।
गुरु अंत पिंगल[५] जंपिओ[६]
सइ[७] छंद संजुत[८] थप्पिओ ॥ ९० ॥

९० । अथ दशाक्षरा । यस्यादौ हस्तो विज्ञातः तथा द्वौ पयोधरौ ज्ञातौ । गुरुरन्ते पिङ्गलेन कथितम् एतच्छन्दः संयुक्तं स्थापितम् ॥ हस्तोऽन्तगुरुश्चतुष्कलः । (C).

९० । अथ दशाक्षरचरणस्य वृत्तस्य चतुर्विंशत्यधिकदशशतं भेदा भवंति, तत्र चतुःषष्ठ्युत्तरत्रिशततमं भेदं संयुक्तनामकं वृत्तं लक्षयति, जस्विति । जस्स[सु]—यत्र आइ—आदौ हत्थ—हस्तः गुर्वंतः सगण इति यावत् विआणिओ—विज्ञातः, तह—ततस्तथा वा वे पओहर—द्वौ पयोधरौ मध्यगुरुकौ जगणाविति यावत् जाणिओ—ज्ञातौ । अंत—जगणद्वयांते पादांते वा गुरु—गुरुः विज्ञात इति पूर्वेणान्वयः, पिंगल जंपिओ—पिंगलजल्पितं सइ—तदेव संजुत—संयुक्तं छंद—वृत्तं, थप्पिओ—स्थाप्यतां ॥ तत्संयुक्तनामकं वृत्तं ज्ञायतामित्यर्थः । ५७ । (E).

९० । अथ दशाक्षरा पंक्तिः । जस्विति । यस्यादौ हस्तोविज्ञातः तथा द्वौ पयोधरौ ज्ञातौ । गुरुरंते पिंगलजल्पितं तच्छंदः संयुक्तं स्थापितम् ॥ हस्तस्सगणः, पयोधरो जगणः । (G).

९० । १ जय (B), जस्स (E). २ हच्छ (A). ३ तसु (A). ४ पओह (E). ५ पिप्पल (B). ६ थप्पिओ (B). ७ सोइ (A, B & C), तइ (F). ८ संयुत (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

तुह[1] जाहि[2] सुंदरि अप्पणा परितेज्जि[3] दुज्जण[4] थप्पणा[5] ।
विअसंत[6] केअइ संपुडा[7] णिहु एहु[8] आविह[9] बप्पुडा[10] ॥
९१[11] ॥ संजुता[12] ।

---

९१ । उदाहरति । त्वं याहि सुन्दरि आत्मना परित्यज्य दुर्ज्जनस्थानम् । विकसन्तु केतकीसंपुटा निभृतमत्रागमिष्यति बप्पुडा ॥ आत्मनेत्यनेन नैश्चित्यं व्यज्यते । बप्पुडा इति शब्दोऽनुकम्प्यजनवाचको देशी, केतकीविकाशे ज्ञापितः स्वयमेवागमिष्यति नायकः, त्वं दुर्जनस्थानं त्यक्त्वा अभिमतस्थानं गच्छ । (C).

९१ । संयुक्तमुदाहरति, तुह इति । हे सुन्दरि सर्वावयवरमणीये विअसंत केअइ संपुडा — विकसत्केतकीसंपुटे एहु — अत्र कुंजे इति शेषः बप्पुडा — त्वदनुकंप्यो नायकः णिहु — निभृतं तूष्णीं पराज्ञातमिति यावत् यथा स्यात्तथा आविह — आगमिष्यति, अत इति शेषः दुज्जण थप्पणा — दुर्जनस्थापनां दुर्जनाः श्वश्रूननांद्रादयस्तेषां स्थापनां परपुरुषनिरीक्षणं न विधेयमित्याद्यनेककौलाचारोपदेशमित्यर्थः परितेज्जि — परित्यज्य अप्पणा — आत्मना स्वयमेवेति यावत् तुह — त्वं जाहि — गच्छ संकेतस्थलं ॥

---

९१ । १ तुह्म (A), तड (F). २ जाउ (A). ३ परितज्जि (A). ४ जुज्जण (B). ५ थप्पिणा (B). ६ चविसन्ति (C). ७ संपुला (A & C), संपुणा (B). ८ एहि (A, B & C). ९ चाइह (A), चाविष (B & C), चावइ (E). १० वणुला (A), वप्पुणा (B). ११ ८९ (A). १२ संयुत्ता (A), संयुता (C).



CC-0. In Public Domain. Funding by IKS-MoE

हार ठवीजे[1] काहल[2] दुज्जे[3] कुंतिअ[4] पुत्ता ए गुरु जुत्ता ।
हत्थ[5] करीजे[6] हार ठवीजे[7] चंपअ[8] माला छंद कहीजे[9] ॥
९२[10] ॥

नायकं प्रति उक्का समागतायाः कस्याश्चित्सख्याः पुरा नायकाभिसारणाय कृतसङ्कल्पां पश्चान्निजकुलक्रमागताचारश्रवणेनाभिसरणमनभिलषमानां कांचिन्नायिकामभिसारार्थं प्रेरयंत्या इदं वाक्यम् । आत्मनेत्यनेन परमनैश्चिंत्यं, बप्पुडेत्यनेन च नायकक्रुपणीयत्वं, विकसत्केतकीसंपुटे इत्यनेन चाभिसारस्थानस्यान्यजनाज्ञेयत्वं व्यज्यत इति मन्तव्यम् । क्वचित् पिउ एवि आविअ बप्पुडेति पाठस्तत्र निभृतमयमागत इति व्याख्येयम् । संयुता [?] निवृत्ता [?] । ५८ । (E).

९१ । यथा । त्वमपि जा[या]हि सुंदरि आत्मना परित्यज्य दुर्जनस्थापनाः दोषारोपान् । विकसितकेतकीसंपुटे निभृतमत्रागमिष्यति त्वदनुकंप्यो नायकः ॥ बप्पुडेति उक्तार्थे देशी । कुंजे इति शेषः । (G).

९२ । हारः स्थाप्यते काहलद्वयं कुन्तीपुत्रः एकगुरुयुक्तः । हस्तः क्रियते हारः स्थाप्यते चम्पकमालाच्छन्दः कथ्यते ॥ हारो गुरुः, काहलद्वयं लघुद्वयं, कुन्तीपुत्रः कर्णः द्विगुरुरिति यावत्, एष कुन्तीपुत्रः गुरुयुक्तः, हस्तो द्वि[अन्त्य]गुरुश्चतुष्कलः । (C).

---

९२ । १ हार ठवीज्जे (A), तारा वीजे (B). २ कालह (B). ३ दिज्जे (A), दूजे (B & C). ४ कुंती (A). ५ हतह (A). ६ ठवीए (A), dropt from this up to the 4th quadrant of śloka 93, in (F). ७ करीजे (A). ८ चम्पक (B & C). ९ सुणीजे (A), करीजे (B & C). १० ९० (A).

Digitized by eGangotri and Sarayu Trust.



जहा, ओग्गर[१] भत्ता रंभअ पत्ता
गाइक घित्ता[२] दुध्ध[३] सजुत्ता[४] ।
मोइणि[५] मच्छा णालिच[६] गच्छा
दिज्जइ कंता खा पुणबंता[७] ॥ ९३[८] ॥ चंपकमाला ।

---

९२ । अथ दशाचरचरणस्य वृत्तस्यैकोनद्विशततमं भेदं चंपकमालानामकं वृत्तं लचयति । हार — गुरुः काहल दुज्जे — काहलद्वयं काहल एकलघ्वात्मको गणस्तद्वयमित्यर्थः, [ए]गुरु जुत्ता — एकगुरुयुक्तः, कुंतिअ पुत्ताए [?] — कुंतीपुत्रः कर्णः गुरुद्वयात्मको-गण इति यावत् ठवीजे — स्थाप्यते । ततः हत्थ — हस्तः गुर्वंतः सगण इति यावत् करीजे — क्रियते, ततश्च हार — एकगुरुः ठवीजे — स्थाप्यते, तत् चंपअमाला छंद — चंपकमालाच्छंदः कहीजे — कथ्यते पिंगलेनेति शेषः ॥ ५९ । (E).

९२ । हारेति । हारः स्थाप्यतां काहलयुग्मं कुंतीपुत्र एक-गुरुयुक्तः । हस्तः क्रियते हारः स्थाप्यते चंपकमालाच्छंदः कथ्यते ॥ हारो गुरुः, काहलो लघुः, कर्णो द्विगुरुः, हस्तः सगणः । (G).

९३ । उदाहरति । ओग्गलभक्तं रम्भापा[प]त्रे गोदुग्धघृतयुक्तं । मोदिनीमत्स्या नालीचद्दचान् ददाति कांता खादति पुण्यवान् ॥

---

९३ । १ चोगर (E). २ दुद्ध (C). ३ दुग्ध (B), घित्त (C). ४ सज्जुत्ता (A), संजत्ता (C), सद्भजुत्ता (E). ५ मोइल (B & C), मोइर (F). ६ नालिच (E & F). ७ पुणमत्ता (A), पुणमन्ता (B), पुणमन्ना (C). ८ ९१ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**दीह[१] लहु जुअ दीह लहु सारवई धुअ[२] छंद कहु ।**
**अंत पओहर ठाइ[३] धआ चोद्दह[४] मत्त बिरामकआ[५] ॥ ९४[६] ॥**

---

उद्गलितं मण्डं भक्तं, ओगरो धान्यविशेष इति केचित्, मोदिनी-[?]मत्स्या मनोज्ञमत्स्यः, नालीचवृत्तः शाकभेदः । (C).

९३ । चंपकमालामुदाहरति, ओगरेति । दुध्ध सजुत्ता — दुग्ध-संयुक्तं ओगर भत्ता — ओगरभक्तं, ओगरो धान्यविशेषस्तदोदन-मित्यर्थः, गाइक घित्ता — गोघृतं मोइणि मच्छा — मद्गुरमत्स्यः ना[णा]लिच गच्छा — नालीचवृत्तः, नालीचो गौडदेशे अनेनैव नाम्ना प्रसिद्धः शाकवृत्तविशेष इत्यर्थः, रंभअ पत्ता — रंभापत्रे कंता — कांतया दिज्जे[ज्जइ] — दीयते, पुणवंता — पुण्यवान् खा — खादति ॥ कस्यचिद्विदूषकस्य निजप्रियवयस्यं प्रति वाक्यमिदम् । चंपकमाला निवृत्ता । ६० । (E).

९३ । यथा । शालिभक्तो[क्तं] रंभापत्रे गोघृतं दुग्धसंयुक्तः[क्तं] । मद्गुरमत्स्यो नालिचशाको दीयते कांतया खादति पुण्यवान् ॥ नालिचशाकः शाकविशेषः । (G).

९४ । दीर्घो लघुयुगलं दीर्घो लघुः सारवती ध्रुवं छन्दः कथितं । अन्ते पयोधरं स्थापयित्वा ध्वजश्चतुर्दश मात्रा विरामीकृताः ॥ दीर्घो गुरुः, पयोधरो जगणः, ध्वज आदिलघुस्त्रिकलः । (C).

---

९४ । १ दिह (C). २ धअ (A), धुव (E). ३ ठाउ (A, B & C). ४ चउद्दह (A), चोकुह (B), चाकुह (C), चौदह (E & F). ५ विराम कहा (E). ६ ९१ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा,

पुत्त पवित्त बहुत्त[1] धणा भत्ति कुटुंबिणि[2] सुद्ध मणा ।
हक्क[3] तरासइ भिच्च गणा को कर बब्बर सग्ग मणा ॥
९५[4] ॥ सारवती ।

---

९४ । अथ दशाक्षरचरणस्य वृत्तस्यैकोनचत्वारिंशाधिकचतुःशततमं ४३९ भेदं सारवतीनामकं वृत्तं लक्षयति, दीहेति । यत्र प्रथमं दीह—दीर्घं गुरुमिति यावत् तदनंतरं लहु[हु] जुअ—लघुयुगं ततोऽप्यनंतरं दीह लहू—दीर्घलघू गुरुलघू इति यावत्, अंत—अंते दीर्घलघ्वोरनंतरमिति यावत् पओहर—पयोधरं मध्यगुरुं जगणमिति यावत् ठाइ—स्थापयित्वा [ध]आ—ध्वजः लघ्वादिस्त्रिकलो गण इति यावत् स्थाप्यत इति शेषः, कहा चउदह मत्त बिराम—कथितः चतुर्दशमात्राविरामः, सारबई—सारवतीनामकं छंद—छन्दः धुअ—ध्रुवं कहु[हु]—कथ्यताम् ॥ प्राकृतभाषायां पूर्वनिपातानियमात् कहा-शब्दस्य पूर्वनिपातकरणे न दोष इति मंतव्यम् । ६१ । (E).

९४ । दीर्घो लघुयुगं दीर्घलघू सारवती ध्रुवं छंदः कथय । अंते पयोधरं स्थापयित्वा ध्वजः चतुर्दशमात्रा विरामकृताः ॥ पयोधरो जगणः, ध्वजो लघुगुरू । (G).

९५ । उदाहरति । पुत्रः पवित्रः बहुतरधनं भक्ता कुटुम्बिनी

---

९५ । १ बहुल (A). २ कुटम्बिणि (C). ३ हाक (B). ४ ९२ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



कसो पढमो[1] हत्थो[2] जुअलो[3]
कसो तिअलो हत्थो[2] चउथो[4] ।
सोला कलआ छक्का वलआ
एसा सुसमा दिट्ठा[5] सुसमा[6] ॥ ९६[7] ॥

---

शुद्धमनाः । हा[ह]क्क त्रस्यन्ति भृत्यगणाः कः करोतु [व]र्ब्बरः स्वर्गं मनः ॥ हक्क-शब्दः कोपवाची । (C).

९५ । सारा[र]वतीमुदाहरति, पुत्तेति । [पवित्त]—पवित्राः पितृभक्ता इति यावत् अथवा पवेः वज्रात् त्रायंत इति पवित्राः वज्रादपि रक्षका इत्यर्थः पुत्राः बहुत्त धणा—बहुतरं धनं भत्ति—भक्ता प्रियभजनपरेति यावत् [सुद्ध मणा]—शुद्धमनाः अकुटिलांतःकरणा कुटुम्बिणि—वधूः यदि एतत्सर्वं भवतीति शेषः । भिच गणा—भृत्यगणः हक्क—हक्केन शब्दव्यापारमात्रेणेति यावत् तरासइ—त्रस्यति, तदा को—कः बब्बर—वर्व्वरः सग्ग—स्वर्गं मणा—मनः कर—करोति न कोऽपीत्यर्थः ॥ ६२ । (E).

९५ । यथा । पुत्राः पवित्राः बहुतरं धनं भक्ता कुटुंबिनी शुद्धमनाः । हक्केन त्रसति भृत्यगणः कः करोति वर्व्वरकः स्वर्गं मनः ॥ [कुटुंबिनी] स्त्री, [हक्क] शब्दविशेषः । (G).

९६ । कर्णः प्रथमो *** हस्तः प्रकटः षोडश कलाः षड्-

---

९६ । १ पचलो (A). २ हत्थो (A). ३ युबलो (E). ४ पचलो (A, B & C). ५ दिट्ठा (B & C). ६ सुसमा (E). ७ ९४ (A), ६२ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



बलया एषा सुस[ष]मा दृष्टा सुस[ष]मा ॥ द्विगुरोरनन्तरम् अन्तगुरुस्तुष्कलः पुनरप्येवं मिलित्वा षोडश कला भवन्ति । अत्र च षड्गुरवः पतन्ति, सुस[ष]मा शोभना, सुस[ष]मेति छन्दः । (C).

९६ । अथ दशा[क्ष]रचरणस्य वृत्तस्य सप्तनवत्यधिकत्रिशततमं भेदं सु[सु]स[ष]मानामकं वृत्तं लक्षयति, कण्णो इति । पढमो—प्रथमः कण्णो—कर्णः गुरुद्वयात्मको गण इति यावत् जुअलो—द्वितीयः हत्थो—हस्तः गुर्वन्तः सगण इत्यर्थः, तिअलो—तृतीयः कण्णो—कर्णः पुनः गुरुद्वयात्मक एव गण इति यावत्, चउथो—चतुर्थः हत्थो—हस्तः पुनः सगण इत्यर्थः यत्र भवतीति प्रतिगणानंतरमध्याहृत्य योजनीयं । सोला कलआ—षोडशकलाका षोडश कलाः मात्रा यस्यां सा तादृशीत्यर्थः, छक्का बलआ—षड्बलया षट् बलया गुरवो यस्यां सा तादृशीत्यर्थः षड्गुरुयुक्तेति यावत् एसा—एषा असुसमा प्राणसमा सुसमा—सुषमा दिट्ठा—दृष्टा पिंगलेनेति शेषः ॥ सुषमानामकमेतद्वृत्तं पिंगले[न] प्रकाशितमित्यर्थः । अत्र कलाज्ञापकं च पदं पद्यपूरणार्थमेव, वर्णवृत्तेषु मात्राकथनस्यानतिप्रयोजनतया [लघु]गुरुज्ञापकत्वाच्चेति मंतव्यं । क्वचित्तु हत्थो पअलो इति पाठस्तत्र हस्तः प्रकट इति व्याख्येयम् । (E).

९६ । कण्णेति । कर्णः प्रथमो हस्तो द्वितीयः कर्णस्तृतीयो-हस्तस्तुर्यः । षोडशकला षड्वलया एषा सुषमा दृष्टा असुसमा ॥ कर्णौ द्विगुरुः, हस्तः सगणः, वलयो गुरुः । (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, भोहा[१] कबिला[२] उच्चा हिअला[३]
मज्झा[४] पिअला णेत्ता[५] जुअला ।
रुक्खा बअणा[६] दंता बिरला[७]
केसे[८] जिबिआ[९] ताका पिअला ॥ ९७[१०] ॥ सुसमा[११] ।

---

९७ । उदाहरति । भ्रूः कपिला उच्चं ललाटं मध्येपीतं नेत्र-युगलं । रूक्षं वदनं दन्ता विरलाः कथं जीवत्यस्याः प्रियः ॥ एतादृग्लक्षणा विधवा भवतीत्यर्थः । (C).

९७ । सुषमामुदाहरति, भो इति । यस्याः भ्रूः कबिला — कपिला ललाटः[टं] उच्चा — उच्चः[चं] णेत्ता यु[जु]अला — नेत्र-युगलं मज्झा पिअला — मध्यपीतं मार्ज्जारनयनसदृशमित्यर्थः । बअणा — वदनं रुक्खा — रूक्षं दंता विरलाः, ताका — तस्याः पिअला — प्रियः कै[के]से — कथं जिबिआ — जीवति ॥ परमकुत्सित-रूपा यस्य कांता स कथं प्राणान्धारयति इति सकलावयव-रमणीयकांताकस्य कस्यचित्कुकांताकं प्रति वचनमिदम् । ६४ । (E).

९७ । यथा । भ्रूकपिला उच्चललाटा मध्येपीतनेत्रयुगलं । रूक्षं वदनं दंताः विरलाः कथं जीवति तस्याः प्रियः ॥ (G).

---

९७ । १ भौंहा (B & C). २ कपिला (A). ३ निघला (A), णिच्चाला (B), लिह्वरा (E), णिदला (F). ४ मझ्झे (A), मज्झे (B & C). ५ णाणण (A). ६ वदणा (F). ७ विचला (A), बिरणा (B). ८ कैसे (B, C, E & F). ९ जिविला (A). १० ९५ (A), ६४ (E). ११ सुखमा (A).

CC-0. In Public Domain. Funding by IKS-MoE

दिअबर हार[1] पअलिआ पुणबि[2] तहट्ठिअ[3] करिआ[4]।
बसु[5] लहु बे गुरु सहिआ अमिअगई धुअ[6] कहिआ॥ ९८[7]॥

९८। द्विजवरहारप्रकटिता पुनरपि तथैव कृता। वसुलघु-द्विगुरुसहिता अमृतगुरु[गतिः] ध्रुवं कथिता॥ द्विजवरश्चतुर्लघुः, हारो गुरुरेताभ्यां प्रकटिता, पादे गुरुद्वयमष्टौ लघवो भवन्ति। (C).

९८। अथ दशाक्षरचरणस्य वृत्तस्य षण्णवत्यधिकचतुःशततमं भेदम् अमृतगतिनामकं वृत्तं लक्षयति, दिअबरेति। दिअबर हार पअलिआ—द्विजवरहारप्रकटिता द्विजवरश्चतुर्लघ्वात्मको गणः हारो गुरुस्ताभ्यां प्रकटितेत्यर्थः, अथवा प्राकृतभाषायां पूर्वनिपातानियमात् प्रकटितद्विजवरहारेति पअलिआ-शब्दस्य पूर्वनिपातं कृत्वा योजनीयं, पुणबि—पुनरपि तहट्ठिअ—तथैव संस्थाप्य द्विजवर-हारौ दत्त्वेति यावत् करिआ—कृता। अथवा पूर्वोक्तप्रकारेण करिआ-शब्दस्य पूर्वनिपातं कृत्वा पुणबि करिआ तहट्ठिअ—पुनरपि कृततथास्थितिः कृता तथा तेन प्रकारेण द्विजवरहार-स्थापनप्रकारेणेति यावत् स्थितिर्यस्याः सा तादृशीति योजनीयम्। बसु लहु बे २ गुरु सहिआ—वसुलघुद्विगुरुसहिता वसवोऽष्टौ, तथा-चाष्टसंख्याकैर्लघुभिर्गुरुद्वयेन च युक्तेत्यर्थः, अमिअगई—अमृतगतिः धुअ—ध्रुवं कहिआ—कथिता॥ तदमृतगतिनामकं वृत्तं कथित-मित्यर्थः। अत्र लघुगुरुज्ञापकस्मरणोऽनतिप्रयोजनकत्वात् पद्यपूर-

९८। १ Dropt in (A). २ पुणुवि (C). ३ तहविअ (A), तहठिअ (B). ४ कहिआ (A). ५ वऊ (F). ६ धूअ (B & C). ७ ९९ (A), १५ (E).

Digitized by eGangotri and Sarayu Trust.



जहा, सरअ[1] सुधाअर[2] बअणा
बिकअ[3] सरोरुह णअणा ।
मअ गल[4] कुंजर गमणी[5]
पिअसहि[6] दिट्ठिअ[7] तरुणी ॥ ९९[8] ॥ अमृतगतिः ।

---

णार्थमिति मंतव्यं, प्रथमं लघुचतुष्टयं तदनंतरमेको गुरुः पुनर्लघुचतुष्टयं पुनरेको हार एते गणाः क्रमेण यस्य चरणे पतंति तदमृतगतिनामकं वृत्तमिति निष्कृष्टोऽर्थः । ६५ । (E).

९८ । दिअ इति । द्विजवरो हारः प्रकटितः पुनरपि तथास्थितः कृतः । वसुलघुदिग्गुरुसहिता अमृतगतिर्ध्रुवं कथिता ॥ द्विजवरश्चतुर्लघुः, हारो गुरुः । (G).

९९ । उदाहरति । शरत्सुधाकरवदना चपलसरोरुहनयना । मदकलकुञ्जरगमना प्रियसखि दृष्टा तरुणी ॥ (C).

९९ । अमृतगतिमुदाहरति, सरेति । सरअ सुधाअर बअणा — शारदसुधाकरवदना बिकच सरोरुह णअणा — विकचसरोरुहनयना । मअ गल कुंजर गमणी — मदकलकुञ्जरगमना तरुणी हे प्रि[य]सखि दिट्ठा — दृष्टा ॥ क्वचित् जिविह सुधा रस बअणेति पाठस्तत्र जीवितस्य प्राणस्य सुधारस इव वचनं यस्याः सा जीवितसुधारसवचना इति व्याख्येयम् । अमृतगतिर्निवृत्ता । ६६ । (E).

---

९९ । १ सरस (A & F). २ सुद्दावण (A). ३ चवल (A, B & C), विकच (E). ४ गय मय (A), मल गय (B), मय कल (F). ५ गमणा (A), गमणी (C). ६ The fourth quadrant runs thus in (A):—जिविय समासय रमणा. ७ दिट्ठय (B), दिट्ठा (E & F). ८ ९७ (A), ९९ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



णील[1] सरूअह[2] एह[3] करीजे[4]
तिसि भआ गण[5] जत्थ[6] कहीजे[7]।
सोलह[8] मत्तह पाअ[9] ठवीजे
दुग्गुरु अंतहि बंधु भणीजे[10] ॥ १००[11] ॥

९९। यथा। शारदसुधाकरवदना विकचसरोरुहवदना[नयना]। मदकलकुंजरगमना प्रियसखि दृष्टा तरुणी ॥ (G).

१००। अथैकादशाक्षरा। नीलस्वरूपम् एतत् क्रियते त्रयो भगणास्तत्र क्रियन्ते। षोडश मात्राः पादे स्थाप्यन्ते द्वौ गुरू अन्ते बन्धुः क्रियते ॥ बन्धुच्छन्दसो नील इत्यपि नामान्तरम्। यद्वा नीलस्वरूपः पिङ्गलः तेनैतत् क्रियते। णील सप्पबद्द [?] इति पाठे स्पष्टार्थः। (C).

१००। अथैकादशाक्षरचरणस्य वृत्तस्याष्टचत्वारिंशोत्तरं सहस्रद्वयं भेदा भवंति, तत्रैकोनचत्वारिंशोत्तरचतुःशततमं ४३९ भेदं बंधुनामकं वृत्तं लक्षयति, णीलेति। जत्थ—यत्र पाअ—पादे तिसि—त्रयः भआ अण—भगणाः भणीजे—भण्यंते, अंतहि—अंते भगणत्रयांते पादांते वेत्यर्थः दुग्गुरु—द्विगुरुः करीजे—क्रियते, सोलह मत्तह—षोडश मात्राश्च ठवीजे—स्थाप्यंते, एह—

१००। १ लील (A & C). २ सरोरुह (A), सरूअ (B). ३ एअ (B & C). ४ करिज्जे (C), कजे (E), कहीजे (F). ५ अण (E & F). ६ तत्थ (A, B & C). ७ धरीजे (A), भणीजे (B & C), करीजे (F). ८ सोडह (B). ९ पाउ (A). १० मुणीजे (A), करीजे (B & E), कहीजे (C). ११ ९८ (A), ९० (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, पंडव[1] बंसहि जम्म[2] धरीजे[3]
संपअ अज्जिअ धम्मक दिज्जे[4] ।
सोउ[5] जुहुठ्ठिर[6] संकट[7] पाबा[8]
देबक[9] लिक्खिअ[10] केण मेटाबा[11] ॥ १०१[12] ॥ बंधु ।

---

एतत् णील सिरोरुह — नीलशिरोरुहेण पिंगलेनेति यावत् बंधु — बंधुनामकं वृत्तं कहीजे — कथ्यते ॥ यद्वा णील सरूअह — नीलस्वरूपापरनामकमिति यावत् बंधु — बंधुनामकं वृत्तं कथ्यत-इति व्याख्येयम् । अत्र मात्राज्ञापकचरणस्यानतिप्रयोजनकत्वात् पद्य-पूरणार्थमेवेति मंतव्यं, भगणत्रयानंतरं गुरुद्वयं यत्र प्रतिचरणं पतति तद्बंधुनामकं वृत्तमिति फलितार्थः । (E).

१०० । अथैका[दशा]चरं त्रिष्टुप् । णीलेति । णी[नी]लसरो-रुहेण पिंगलेनै[त]त्कथितं त्रयो भगणा यत्र भण्यंते । षोडश मात्राः पादे स्थाप्यंते द्विगुरुरंतो[ति] बंधुः छंदः कथ्यते ॥ नीलसरोरुहः पिंगलः । (G).

१०१ । पाण्डववंशे जन्म धृत्वा सम्पदम् अर्ज्जयित्वा धर्माय

---

१०१ । १ पाण्डव (B & C). २ जन्म (B & F). ३ करीजे (A), धरिज्जे (E & F). ४ धम्म करीजे (A), विप्पंच दीजे (B & C), धम्मके दिज्जे (E). ५ सोइ (A & C), सोहि (B). ६ जुधिट्ठिर (A), जुहिट्ठिर (B), युधिट्ठिर (C). ७ दुक्ख (C). ८ पाआ (B & C). ९ देवक (B & C), दैवक (E & F). १० लेक्खल (A), लेक्खिअ (E & F). ११ मेटाआ (B & C), मिराआआ (F). ए to be read short in मेटावा. Vide श्लोक ५, p. 7. १२ ९९ (A), ९८ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



दिअम्बर हार लह्ह जुअला
बलअ परिट्ठिअ[1] हत्थ अला ।
पअ कल चोद्दह[2] जंप[3] अही
कइवर[4] बम्हहि[5] हो[6] सुमुही ॥ १०२[7] ।

---

दीयते। तेनापि युधिष्ठिरेण सङ्कटं प्राप्यते दैवलिखनं केन लुप्यते ॥ (C).

१०१। बंधुमुदाहरति, पण्डवेति। पण्डव बंसहि — पांडववंशे पाण्डोरयं — पाण्ड[वः] पांडवश्चासौ वंस[श]श्चेति पांडववंस[श]-स्तस्मिन्नित्यर्थः यस्येति [शेषः] जम्म — जन्म क्रियते विधात्रेति भावः, अज्जिअ — अर्ज्जयित्वा संपअ — संपत् धम्मके — धर्म्माय दिज्जे — दीयते येनेति शेषः। सोउ — सोऽपि जुह्ठिर — युधिष्ठिरः संकट — संकटं पाआ — प्राप्तः, अतः दै[दे]वक — दैवस्य विधेरिति यावत् लेक्खिअ — लिखितं केण — [केन] मेटावा — विलुप्यते ॥ न केनापीति भावः। बंधुर्निवृत्तः। एतस्यैवान्यत्र दोधक-संज्ञा। ६८। (E). [This anomaly has been taken notice of, in Ghosha's Compendium, p. 70, foot-note.—Ed.]

१०१। पांडववंशे जन्म क्रि[भ्रि]यते संपदम् अर्जयित्वा धर्मार्थे

---

१०२। १ पविट्ठिअ (A), परिट्ठव (B), परिट्ठर (C). २ चउदह (A), चोद्दह (C), चौदह (E & F). ३ जंपु (A). ४ कइजण (A). ५ बालहि (A), बम्भहि (B), जाणह (E), जाणहि (F). ६ सो (E & F). ७ १०० (A), ९९ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, अइचल जोब्बण देह धणा
सिविणअ[1] सोअर बंधु अणा[2] ।
अवसउ काल पुरी गमणा
परिहर बब्बर पाप मणा ॥ १०३[3] ॥ सुमुखी ।

दीयते । युधिष्ठिरः संकटं प्राप्नोति दैवतलिखितं केन प्रोंच्छ्यते ॥ (G).

१०२ । द्विजवरो हारः लघुयुगलं वलयपरिस्थितं हस्ततलं । पदे कलाश्चतुर्दश जल्पति अहिः कविजनवल्लभा सुमुखी ॥ द्विजवरो लघुचतुष्कलं, हारो गुरुः, वलयं गुरुर्हस्ततलं चतुष्कलोऽन्तगुरुः । (C).

१०२ । अथैकादशाचरचरणस्य वृत्तस्याशीत्यधिकाष्टशततमं भेदं ८८० सुमुखीनामकं वृत्तं लक्षयति, दिअवरेति । दिअवर— द्विजवरश्चतुर्लघ्वात्मको गणः ततो हार—हारो गुरुरिति यावत्, ततो लहु जुअला—लघुयुगलं, ततश्च वलअ—वलयो-गुरुः, ततश्च हत्थ अला—हस्ततलं गुर्वंतः सगण इति यावत्, एवं-प्रकारेण यत्र चउदह [?] कल—चतुर्दश कलाः पअ—पादे परिट्ठिअ—परिस्थिताः, सो—सा [सु]मुही—सुमुखी जाणहु—ज्ञायतां तत्सुमुखीनामकं वृत्तं ज्ञेयमित्यर्थः, इति कइवर—कविवरः अही—अहिः पिंगल इति यावत् जंपइ [?]—जल्पति । ६९ । (E).

१०३ । १ सिवणअ (E). २ जणा (E). ३ १०१ (A), ७० (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



चामर[1] काहल[1] जुग्ग ठवीजे
हार लहु जुअ तत्थ[3] धरीजे ।
कस[4] गणा पअ अंत करीजे[5]
दोधअ[6] छंद फणी पभणीजे[7] ॥ १०४[8] ।

१०२ । द्विज इति । द्विजवरो हारो लघुयुगलं वलयः प्रतिष्ठितहस्ततलः । पादे कलाश्चतुर्दश जल्पति अहिः कविवराः जानीत सा सुमुखी ॥ द्विजवरश्चतुर्लघुः, हारो गुरुः, वलयो गुरुः, हस्तः सगणः । (G).

१०३ । उदाहरति । अतिचलानि यौवनदेहधनानि, स्वप्नसहोदरा बन्धुगणाः । अवश्यं कालपुर्य्यां गमनं परिहर बर्ब्बर पापं मनः ॥ (C).

१०३ । सुमुखीमुदाहरति, अइ इति । जोब्बण देह धणा — यौवनदेहधनानि अइचल — अतिचलानि, सोअर — सोदरा भ्रातर इति यावत् बंधु जणा — अन्ये अपि कुटुम्बा इत्यर्थः सिबणअ — स्वप्नवत् स्वप्नेन तुल्यम् इति यावत् । यद्वा बंधुजनाः सिविणअ सोअर — स्वप्नसोदराः स्वप्नतुल्या इत्यर्थः । काल पुरी गमणा — यमपुरीगमनम् अबस[उ] — अवश्यम् अतो हेतोः हे बर्बर मणा — मनः

१०४ । १ चामल (F). २ कोमल (B). ३ तच्छ (A), पाच (B & C). ४ गण (A). ५ र दीजे (A), धरीजे (B & C). ६ दोहब (B). ७ फणीस भणीजे (A), छंदक णाम करीजे (B), छंदह नाम करीजे (C), फणी पभणिज्जे (F). ८ १०२ (A), ०१ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पाप — पापात् परिहर ॥ कंचिन्महापापकर्म्मासक्तं प्रति कस्य-चिन्मित्रस्योपदेशवाक्यमेतत् । सुमुखी निवृत्ता । ७० । (E).

१०३ । यथा । अतिचलानि यौवनदेहधनानि स्वप्नसोदरो-वंधुजनः । अवश्यं काल[पुरी]गमनं परिहर बर्ब्बर पापे मनः ॥ (G).

१०४ । चामरं काहलयुग्मं हारलघुयुगं तथा ध्रियते । कर्ण-गणाः पदान्ते क्रियन्ते दोधकच्छन्दः फणीन्द्रेण भण्यते ॥ चामरं गुरुः, काहलं लघु युग्मं तयोर्युग्ममित्यर्थः, हारः लघुयुगं । हार लह जुअ जुग धरीजे इति पाठः सुगम एव । अत्र यद्यपि बन्धु-च्छन्दसा सहाभेदस्तथापि छन्दस्तदेव नामान्तरेण अन्यमुनिनोक्त-मिति दर्शितं । केचित्तु चामरकाहलयुग्मादीनामत्र नियमः, न तु क्रमतस्तात्पर्य्यं, तथा च हरतु दुरितं देवमुरारिरित्यादिकमपि दोधकच्छन्द एवेत्याहुः । (C).

१०४ । अथैकादशाचरचरणस्य वृत्तस्यैकोनचत्वारिंशोत्तरचतुः-शततमं भेदं पुनरपि दोधकमेवेति नामांतरेणाह, चामरेति । यत्र प्रथमं चामर — चामरं गुरुरिति यावत् काहल जुग्ग — काहलयुगं काहलो लघुस्तन्जु[यु]गमित्यर्थः, ठवीजे — स्थाप्यते, ततश्च हार — हारो गुरुः लहु — लघू हारानन्तरं द्वौ लघू इत्यर्थः जुअ — जु-[यु]गं वारद्वयमित्यर्थः एको गुरुस्तदनन्तरं लघुद्वयमिदं वारद्वय-मिति परमार्थः, तत्थ — तथ्यं तथा वा धरीजे — ध्रियते । एवं सति भगणत्रयं सिध्यति, अन्यथा चामरकाहलयुगानन्तरं हारलघुद्वय-मात्रोक्त्या तृतीयभगणालाभाद्भ्रांतप्रलपितत्वापत्तिरित्यस्मत्तातचर-णोपदिष्टव्याख्योपदेशो निर्मत्सरैः सुधीभिर्विभावनीयः । पअ अंत —

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, पिंग जटावलि ठाविअ गंगा
धारिअ[1] णाअरि[2] जेण अधंगा ।
चंदकला जसु सीसहि णोक्खा[3]
सो तुह[4] संकर दिज्जउ[5] मोक्खा[6] ॥१०५[7]॥ दोधक ।

---

पादांते कस गणा — कर्णगणः गुरुद्वयात्मको गण इति यावत् करीजे — क्रियते, फणी — पिंगलः तत् दोधकच्छन्दः दोधकनामकं वृत्तं पभणीजे — प्रभणति ॥ यत्र भगणत्रयोत्तरं गुरुद्वयं तद्दोधकनामकं वृत्तमिति फलितार्थः । बंधुदोधकयोश्चोद्‌वनिकामात्रभेदाद्भेदः स्वरूपतस्तु न कश्चिद्विशेष इति विभावनीयम् । (E).

१०४ । चामलेति । चामरं काहलयुग्मं स्थाप्यतां, हारलघुयुगं तत्र स्थाप्यतां । कर्णगणः पादांते क्रियते, दोधकच्छंदः फणी प्रभणति ॥ चामरो गुरुः, काहलो लघुः, हारस्य गुरोर्लघ्वोश्च युगमित्यर्थः । कर्णो द्विगुरुः । (G).

१०५ । उदाहरति । पिङ्गलजटावलीस्थापितगङ्गः धृता नागरी येनार्द्धांगे । चन्द्रकला यस्य शीर्षे स्थिता [लोक्या] स तुभ्यं शङ्करः [द]दातु मोचम् ॥ (C).

१०५ । दोधकमुदाहरति, पिंगेति । येन पिंग जटावलि — ता[म्र]जटावल्यां गंगा ठाविअ — स्थापिता, अथवा यः पिंगजटावलीस्थापितगंग इत्येकमेव पदं शिवविशेषणं, येन अद्धं[धं]गा

---

१०५ । १ ठाविअ (A). २ णाअरी (C). ३ लोक्का (C), चोक्खा (F). ४ तुअ ( E & F). ५ दिज्जइ (B), दीज्जउ (E). ६ साक्खा (E), सोक्खा (F). ७ १०२ (A), ७९ (E).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



कसो दुसो[1] हार एक्को[2] बिसज्जे
सल्ला कसा गंध कसा सुणिज्जे[3] ।
बीसा[4] रेहा पात्र पाए गणिज्जे[5]
सप्पा राए सालिणी सा मुणिज्जे[6] ॥ १०६[7] ॥

—अर्द्धांगे नागरी स्त्रीति यावत् धारिअ—धृता । जसु—यस्य सीसहि—शीर्षे णोक्खा—रमणीया चंदकला—चन्द्रकला दृश्यते इति शेषः, सो—सः संकर—शिवः तुम्र—तुभ्यं मोक्खा [?]—मोचं दुःखप्रागभावासमानाधिकरणं दुःखध्वंसमिति यावत् दीज्जउ—ददात्विति यावत् ॥ दोधकं निवृत्तम् । ७२ । (E).

यथा । पिंगलजटावलिस्थापितगंगो धारिता येन नागरी अर्धांगे । चंद्रकला यस्य शीर्षे रमणीया, स तव शंकरो-ददातु सौख्यं ॥ (G).

१०६ । कर्णौ द्विगुरुः स द्विगुणः ततोऽपि हार एकः सन्नीकृतः शल्यं कर्णः गन्धः कर्षः । विंशतिः कलाः पादे पादे गणय सर्पराजेन सा[शा]लिनी भणिता ॥ कर्णौ द्विगुरुस्तस्य द्विगुणः चतुर्गुरुरिति यावत्, ततो हारो गुरुः, शल्यं लघुः, कर्णौ द्विगुरुः, गन्धो-लघुः, कर्णौ द्विगुरुः । (C).

१०६ । अथैकादशाचरचरणस्य वृत्तस्यैकोननवत्युत्तरद्विशततमं भेदं २८९ शालिनीनामकं वृत्तं लचयति, कसविति । यत्र प्रथमं कसो दुसो—कर्णद्वयं कर्णौ गुरुद्वयात्मको गणस्तद्द्वयमित्यर्थः

१०६ । १ दुसो (A). २ एको (C). ३ एको सुणिज्जे (C). ४ बीहा (B & C). ५ भणिज्जे (A & B). ६ सुणिज्जे (A). ७ १०४ (A), ७२ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



अह्रा, रंडा चंडा[१] दिक्खिदा[२] धम्म दारा
मज्जं मंसं पिज्जए[३] खज्जए आ[४] ।
भिक्खा भोज्जं चम्म खंडं च सेज्जा[५]
कोलो[६] धम्मो कस्स णो भादि रम्मो[७] ॥ १०७[८] ॥
सालिणी ।

हार एक्को—हार एकः हारो गुरुरित्यर्थः बिसज्जे—विसृज्यते, ततः सल्ला कणा गंध कणा—शल्यकर्णगंधकर्णाः, शल्यो लघुः, कर्णो-गुरुद्वयात्मको गणः, गंधो लघुः, कर्णो गुरुद्वयात्मको गण एते इत्यर्थः पाअ पाए—पादे पादे प्रतिचरणमिति यावत् सुणिज्जे—श्रूयते, तथा बीसा—विंशतिः रेहा—रेखा माचा इति यावत् गणिज्जे गण्यंते, सा सप्पा राए—सर्पराजेन सालिणी—शालिनी-नामकं वृत्तमिति यावत् मुणिज्जे—मन्यते ॥ अत्र मात्राकथनं पादपूरणार्थमेव, लिंगविभक्तिवचनव्यत्यासस्तु प्राकृतभाषायां न दोषायेति मन्तव्यं । मगण-तगणत्र[द्व]योत्तर-गुरुद्वयरचितचरणा शालिनीति फलितार्थः । ७२ । (E).

१०६ । कणो इति । कर्णयुगं हारम् एकं विसृज्य शल्यः कर्णः गंधः कर्णः श्रूयंते । विंशतिः रेखाः पादे पादे गण्यंते सर्पराजेन शालिनी सा मान्यते ॥ कर्णो द्विगुरुः, हारो गुरुः, शल्यगंधौ लघू । (G).

१०७ । १ रण्डा (C). २ दिक्खिषा (A & B), दीक्खिदा (C). ३ पिज्जिए (E). ३ & ४ खज्जए पिज्जए ष (B), खज्जए पिज्जए च (C). ४ खज्जए ष (A). ५ सज्जा (A & C), सेजा (B). ६ कोणो (A). ७ रत्यो (B). ८ १०५ (A), ७४ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



दिअ[१]बर जुअ लहु[२]जुअलं पअ[३] पअ पअलिअ बलअं ।
चउ पअ चउ बसु[४] कलअं[५] दमणाअ फणि भण[६] ललिअं[७] ॥
१०८[८] ॥

१०७। उदाहरति। रण्डा रण्डा दीक्षिता धर्म्मदारा रम्यं [मद्यं] मांसं खाद्यते पीयते च। भिक्षा यो[भो]ज्यं चर्म्मखण्डञ्च शय्या कौलो धर्म्मः कस्य नो भाति रम्यः॥ बन्धुहीनत्वमत्र तु लक्ष्यते सैव दीक्षिता यथाविधिगृहीतमन्त्रा धर्म्मदारत्वं प्रापिता, भोज्यं किम् इत्यादिकाकांक्षायां भिक्षालब्धमित्यर्थः, कौलो धर्म्मः शाक्त-शास्त्रविषयोक्तधर्म्मः। कर्पूरमञ्जर्य्यां भैरवानन्दस्येयमुक्तिः। (C).

१०७। शालिनीमुदाहरति, रण्डेति। चंडा परमकोपवती दिक्खिदा—दीक्षिता शाक्तशास्त्रोक्तविधिगृहीतमन्त्रेति यावत् रण्डा—विधवा धम्म दारा—धर्मपत्नी, मज्जं—मद्यं पिज्जिए—पीयते, मंसं अ[आ]—मांसं च खज्जए—खाद्यते। भिक्खा—भिक्षा भोज्जं—भोज्यं चर्मखण्डं च सेज्जा—शय्या, एतादृशः कोलो—कौलः वंशपरंपरापरिप्राप्तः शाक्ततंत्रविशेषोक्त इति यावत् धम्मो—धर्म्मः कस्स—कस्य रम्मो—रम्यो नो भाति॥ अपि तु सर्वस्यापीत्यर्थः। कर्पूरमंजरीनाटकस्थं कापालिकभैरवानन्दस्य राजानं प्रति वाक्यमिदम्। ७४। शालिनी निवृत्ता। (E).

१०८। १ द्विज (F). २ लघु (F). ३ Dropt in (B). ४ वसु (A). ५ कलअं (A). ६ भण फणि (A), मण फणि (B & C). ७ भणिअं (A & C), फणिअं (B). ८ १०९ (A), ७५ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, परिणअ[1] ससहर बअणं
बिमल कमल दल णअणं।
बिहिअ[2] असुर कुल दलणं[3]
पणमह[4] सिरि[5] महु महणं ॥ १०६[6] ॥ दमणक[7]।

---

१०७। यथा। रंडा चंडा दीक्षिता धर्मदारा मद्यं मांसं पीयते खाद्यते च। भिक्षा भोज्यं चर्मखंडं च शय्या कौलो धर्मः कस्य नो भाति रम्यः ॥ (G).

१०८। द्विजवरयुगलं लघुयुगलं पदे पदे प्रकटितवलयम् अन्ते गुरुयुक्तं। * * * चतुर्व्वसुकलम् अष्टचत्वारिंशत्कलम्। (C).

१०८। अथैकादशाक्षरचरणस्य वृत्तस्य चतुर्विंशत्युत्तरसहस्रतमं भेदं दमनकनामकं वृत्तं लक्षयति, दिअवरेति। दिअबर जुअ— द्विजवरयुगलं चतुर्लघ्वात्मकगणद्वयमिति यावत् लहु जुअलं— लघुयुगलं बलअं—बलयं गुरुरिति यावत् पअ पअ— पादे पादे प्रतिचरणमिति यावत् पअलिअ — प्रकटितं। चउ पअ — चतुःपादेषु चउ बसु कलअं — चतुर्वसुकलाकं दक्षिणगत्यैवांकस्थापनेन ४८ चतुर्वसुशब्देनाष्टचत्वारिंशन्मात्रा लभ्यंते, तथा चतुर्ष्वपि पादेषु मिलिताष्टचत्वारिंशन्मात्राकमिति तत्त्वं, दमणअ—दमनकं फणी ललिअं — ललितं यथा स्यात्तथा भण — भणति॥ लघुदशकोत्तरगुरुरचितचरणो दमनक इति फलितार्थः। ७५। (E).

---

१०६। १ पअलिअ (A, B & C). २ बलिअ (A, B & C). ३ दहणं (B & C). ४ पणवह (A). ५ सिर (E). ६ १०७ (A), ७६ (E). ७ दमणअ (C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



ताल णंदए समुद्द तूरत्रा[१]
जोहलेण छंद एहु[२] पूरत्रा ।
गारहाइँ[३] अक्खराइ[४] जाणित्रा
णात्र रात्र[५] जंप एत्र[६] सेणित्रा[७] ॥ ११०[८] ॥

१०८ । दिअ इति । द्विजवरयुगं लघुयुगलं पदे [पदे] प्रकटितवलयं । चतुःपदे चतुर्वसुकलं दमनकं फणी भणति खलितं ॥ वलयो गुरुः । (G).

१०९ । उदाहरति । प्रकटितं शशधरतुल्यं वदनं यस्य विमलकमलदलनयनं । वलिकासुरकुलदहनं प्रणमामि शिरसि मधुमथनं कृष्णं ॥ (C).

१०९ । दमनकमुदाहरति, परिणअ इति । परिणअ [ससहर वअणं] — परिणतशशधरवदनं विमलकमलदलनयनं । विहितासुर-[कुल]दमनं मऊ महणं — मधुमथनं श्रीकृष्णं [सिर — शिरसा] पणमह — प्रणमत ॥ दमनको निवृत्तः । ७६ । (E).

१०९ । यथा । परिणतशशधरवदनं विम[ल]कमलदलनयनं । विहितासुरकुलदहनं प्रणमत श्रीमधुमथनम् ॥ (G).

११० । तालनन्दसमुद्रतूर्यजोहलेन एतत् छन्दः पूरय । एकादशाक्षराणि ज्ञातानि नागराजो जल्पत्येषा सेनिका ॥ तालादय-

११० । १ तूरआ (B). २ एह छंद (A & B), एऊ छन्द (C). ३ गारगाइ (B). ४ अक्खराणि (F). ५ राआँ (A). ६ एत्तु (A & B), एत्त (E). ७ 4th quadrant dropt in (C). ८ १०८ (A), ७७ (E).

6341.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, झत्ति पत्ति पाअ भूमि कंपिआ
टप्पु[1] खुंदि खेह[2] सूर झंपिआ ।
गोल[3]राअ जिणि[4] माण मोलिआ
कामरूअ[5] राअ बंदि[6] छोलिआ[7] ॥ १११[8] ॥

सेनिका[9] ।

खलारोऽन्तलघुत्रिकलवाचकाः, [Vide श्लोक १९, p. 27.—Ed.] जोहलः पञ्चकलो मध्यलघुः । (C).

११० । अथैकादशाक्षरचरणस्य वृत्तस्य व्यशीत्युत्तरषट्शततमं ६८३ भेदं सेनिकानामकं वृत्तं लक्षयति, तालेति । आदौ ताल णंदए — तालनन्दाभ्यां ततः समुद्द तूरआ — समुद्रतूर्या[भ्यां] गुर्वादित्रिकलगणाभ्यामित्यर्थः ततश्च जोहलेन मध्यलघुकेन रगणेनेति यावत् एऊ — एतत् सेणिआ — सेनिकानामकं छंद — वृत्तं पूरआ — पूर्य्यतां । अत्र च प्रतिपदं गारहा[इ] अक्खराइ — एकादशाक्षराणि जाणिआ — ज्ञातव्यानि, एअ — एतत् णाअ राअ — नागराजः जंपि[प] — जल्पति ॥ यद्वा एकादशाक्षरज्ञातेत्येकं पदं कृत्वा वृत्तविशेषणपरतया गारहाइँ इति चरणे जो[यो]जनीयः । अत्राक्षरकथनमनतिप्रयोजनकतया पद्यपूरणायेति बोध्यम् । गुरूत्तरैः पंचभिर्गुर्वादित्रिकलगणै रचितचरणा सेनिकेति निष्कृष्टार्थः । (E).

११० । तालेति । तालनन्दाभ्यां समुद्रतूर्याभ्यां जोहलेन छंद एतत्

१११ । १ टप्पि (A), टप्प (B & C). २ खुज्जि धूलि (B & C). ३ गौड़ (E & F). ४ जिणि (A). ५ कामरूप (B). ६ बंधि (A). ७ छोडिआ (B & C). ८ १०९ (A), ७८ (E). ९ सुसेनिका (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



कुंतीपुत्ता पंचा दिण्णा[1] जाणीआ
अंते कंता[2] एक्का[3] हारा माणीआ ।
पाआ पाआ मत्ता दिठ्ठा[4] बाईसा[5]
मालत्ती[6] छंदा[7] जंपंता[8] णाएसा ॥ ११२[9] ॥

पूर्यतां । एकादशाक्षराणि ज्ञातव्यानि नागराजो जल्पति एषा श्वेनिका ॥ तालेति गुरुलघुरूपा गणाश्चत्वार इत्यर्थः, जोहलो रगणः । (G).

१११ । उदाहरति, झत्तीत्यादि । टापैश्चलदश्वखुरैः चुणाभिधुलिभिः ख[?]शब्दो धूलिवाचको देशीति वदन्ति, परे तु खशब्दः चोदवाचकः, तथाच टापोत्थितैः चोदैः खे आकाशे हि निश्चितं सूर्य आच्छन्न इत्यर्थः । * * * * (C).

१११ । श्वेनिकामुदाहरति, झत्तीति । झत्ति — झटिति पत्ति पाअ पदातिपादैः भूमि — भूमिः कंपिआ — कंपिता, टप्पु खुंदि खेह — टापोत्खातखेहैश्चलदश्वखुरोद्धूतरेणुभिरिति परमार्थः सूर — सूर्य्यः झंपिआ — आच्छादितः । गौड़ राअ जिणि — गौड़राजं जित्वा माण मोडि[लि]आ — मानमोडिता कामरूअ राअ बंदि छोलिआ — का[म]रूपराजवंदी मोचिता ॥ ७८ । श्वेनिका निवृत्ता । (E).

१११ । यथा । झटिति पत्तिपादैर्भूमिः कंपिता चलदश्वखुरोद्धूतरेणुभिः सूर्य आच्छादितः । गौडराजं जित्वा ग्रीवानम्रा कामरूपराजवंदी मोचिता ॥ अत्र टप्पु इति माणेति उक्तार्थे देशी । (G).

११२ । १ दिणा (A). २ कणा (A). ३ एक्को (B). ४ दिषा (A), पत्ता (B), dropt in (C). ५ वाकुसा (B). ६ मलत्ती (C), मलंती (F). ७ माला (A, B & C). ८ जल्पन्ता (B), जम्पत्ता (C). ९ ११० (A), ७९ (E).

CC-0. In Public Domain. Funding by IKS-MoE

जहा, ठामा ठामा हत्थी[1] जूहा[2] देक्खीआ[3]
णीला[4] मेहा मेरू[5] सिंगा[6] पेक्खीआ[7]।
बीरा[8] हत्था[9] अग्गे खग्गा राजंता[10]
णीला[4] मेहा मज्झे बिज्जू[11] णच्चंता ॥ ११३[12] ॥

मालती[13]।

---

११२। कुन्तीपुत्राः पञ्च दत्ता ज्ञाताः, अन्ते कान्त एको-हारो मन्यते। पादे पादे मात्राः प्राप्ता द्वाविंशतिः मालतीमाला जल्प्यते नागेनैषा ॥ कुन्तीपुत्रः कर्णो द्विगुरुः, कान्तः कमनीयः, हारो गुरुः। (C).

११२। अथैकादशाचरचरणस्य वृत्तस्य प्रथमं भेदं मालती-नामकं वृत्तं लक्षयति, कुंतीति। यत्र पाआ [पाआ] — पादे पादे प्रतिपादमिति यावत् दिण्णा — दत्ताः पंच कुंतीपुत्राः कर्णा गुरु-द्वयात्मका गणा इति यावत् जाणीआ — ज्ञायंते, अंते — कर्ण-पंचकांते पादांते वा कंता — कांतः एक्का — एकः हारा — हारः गुरुरिति यावत् माणीआ — मान्यते। बाईसा — द्वाविंशतिः मत्ता — मात्राः दिट्ठा — दृष्टा यत्र पादे पादे इति पूर्वेणान्वयः, तत् मालत्ती छंदा — मालतीच्छन्दः णाएसा — नागेशः जंपंता —

---

११३। १ हत्थी (A), हत्ती (B). २ जूथा (B & C). ३ पेक्खिआ (A), देखीआ (F). ४ णाई (A, B & C). ५ मारू (B). ६ सिंगे (A, B & C). ७ देक्खीआ (A). ८ वीआ (E). ९ हत्था (A), हत्थे (B & C). १० वजुंता (A), रजुन्ता (B & C). ११ विज्जू मेहा मज्झे (A). १२ १११ (A), ८० (E). १३ मालतीमाला (A).



Digitized by eGangotri and Sarayu Trust.
CC-0. In Public Domain. Funding by IKS-MoE

दिज्जे तआरा[१] जुअला पएसुं[२]
अंते णरेंदो[३] गुरु जुग्ग सेसं ।
जंपे फणिंदा[४] धुअ[५] इंदबज्जा
मत्ता दहा अट्ठ[६] समा सुसज्जा ॥ ११४[०] ॥

---

जल्पति ॥ अत्र कांत-पदं मात्राज्ञापकं च पद्यपूरणार्थमिति मंतव्यम्, एकादशगुरुरचिता मालतीति निष्कृष्टोऽर्थः । ७९ । (E).

११२ । कुंतीति । कुंतीपुत्राः पंच दत्ता ज्ञातव्या अंते कांतः एको हारो माननीयः । पादे पादे मात्रा दृष्टा द्वाविंशतिर्मालती-च्छंदः जल्पति नागेशः ॥ कर्णो द्विगुरुः, हारो गुरुः । (G).

११३ । उदाहरति । स्थाने स्थाने हस्तियूथानि दृश्यन्ते यथा मेघा मेरुशृङ्गे दृश्यन्ते । वीरहस्ताग्रे खड्गा नृत्यन्ति यथा विद्यु-न्मेघमध्ये नृत्यति ॥ (C).

११३ । मालतीमुदाहरति, ठामेति । मेरु सिंगा — मेरुशृंगे यथेति शेषः णीला मेहा — नीला मेघाः पेक्खीआ — प्रेक्ष्यंते, ठामा ठामा — स्थाने स्थाने हत्थी जूहा — हस्तियूथानि [तथे]ति शेषः देक्खीआ — दृश्यंते । णीला मेहा मझ्झे — नीलमेघमध्ये यथेति शेषः विद्युत् णच्चंती — नृत्यति, वीरा[आ] हत्था अग्गे — वीर-

---

११४ । १ दिज्जेइ हारा (A), दिजेइ हीरा (B), दिव्भेइ हीरा (C), दिज्जे त राआ (F). २ पएसु (B), पएसं (C), पएसूं (E). ३ णरेंदा (A), णरेन्दा (B & C). ४ भणिंदा (A), फणींदा (F). ५ धुव (F). ६ अट्ठ (B & C). ० ११९ (A), ८१ (E).

Digitized by eGangotri and Sarayu Trust.



हस्ताग्रे तथेति शेषः खग्गा — खड्गाः राजंता — राजंति ॥ केनचिद्वन्दिना कृतं संग्रामवर्णनमेतत् । मालती निवृत्ता । ८० । (E).

११२ । यथा । स्थाने स्थाने हस्तियूथानि दृश्यंते, नीला मेघाः मेरुशृंगे मेच्यंते । वीरहस्ताग्रे खड्गा राजंते, नीलमेघमध्ये विद्युन्नृत्यति ॥ (G).

११४ । दीयते हीरयुगलं पदे, अन्ते नरेन्द्रो गुरुयुगलशेषः । जल्पति फणीन्द्रः ध्रुवमिन्द्रवज्रां मात्रा दशाष्टभिः समाः सुसज्जाः ॥ हीरशब्दः अन्तलघुपञ्चकलवाची [Vide श्लोक १९, p. 24, and its gloss (G), p. 25.—Ed.] नरेन्द्रो जगणः, यत्र मात्राः दशाष्टाभिः सुसज्जीकृताः । (C).

११४ । अथैकादशाचरचरणस्य वृत्तस्य सप्तपंचाशदुत्तरत्रिशततमं भेदं ३५७ इन्द्रवज्रानामकं वृत्तं लक्षयति, दिज्जे इति । यत्रादौ तआरा जुअला — तकारयुगलं लब्धं तगणद्वयमित्यर्थः, अंते — तगणद्वयांते गुरु जुग्ग सेसं — गुरुयुगशेषः गुरुद्वयं शेषेऽंते यस्य तादृश इति यावत् णरेंदो — नरेन्द्रो मध्यगुरुर्जगण इति यावत् पएसुं[सूं] — पदेषु दिज्जे — दीयते । सा मत्ता दहा अट्ठ समा सुसज्जा — सुसज्जसमाष्टादशमात्राका सुसज्जाः सुस्थापिताः समाः पदचतुष्टयेऽन्यूनानतिरिक्ता अष्टादश मात्रा यस्यां सेति यावत् इंदवज्जा — इंद्रवज्रा इति धुअ — ध्रुवं फणिंदा — फणींद्रः जंपे — जल्पति ॥ सुसज्जा — शोभनीकृत्य स्थापिताः समा — पदचतुष्टये समानाः दहा अट्ठ — अष्टादश मत्ता — मात्राः यत्र पएसु[सूं] — पदेषु पतंतीति शेष इति भिन्नमेव योजनीयं । अत्र मात्राकथनं पद्य-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, मंतं[१] ण तंतं ण हु किंपि[२] जाणे[३]
झाणं[४] च[५] णो किंपि[२] गुरुप्पसाओ[६] ।
मज्जं पिबामो[७] महिलं रमामो
मोक्खं[८] बजामो[९] कुल मग्ग लग्गा ॥ ११५[१०] ॥
इंदबज्जा ।

पूरणार्थमेव, अवहट्ठभाषायां पूर्वनिपातानियमात् पूर्वापरव्यत्यासस्तु न दोषायेति ध्येयं, तगणद्वयानंतरजगणानंतरगुरुद्वयरचितचरणा इंद्रवज्रेति फलितार्थः । (E).

११४ । दिज्जे इति । दीयेत राजयुगलं पदेषु अंते नरेंद्रो-गुरुयुग्मशेषः । जल्पति फणींद्रो ध्रुवम् इंद्रवज्रां मात्रा दशाष्टौ समाः सुसज्जाः ॥ राजा[?] तगणः, नरेंद्रो जगणः, समाः सर्वरसेषु अनुकूलाः । (G).

११५ । उदाहरति । मन्त्रं न तन्त्रं न हि किमपि जाने ध्यानञ्च न किमपि गुरुप्रसादात् । मद्यं पिबामो महिलां रमामः[महे] मोक्षञ्च यामः कुलमार्गलग्नाः ॥ यद्यहं मन्त्रादिकं न जाने तथापि वयं सर्व्वे साधका मद्यं पिबामः महिलां रमाम[हे] इत्यर्थः, तदिदमनर्थाय भवेदित्याह एवं कुर्व्वाणाः कुलपथलग्नाः मोक्षं प्राप्नुम इत्यर्थः । कर्पूरमञ्जर्य्यां भैरवानन्दोक्तिरियम् । (C).

११५ । इन्द्रवज्रामुदाहरति, मंतमिति । मंतं — मंत्रं तंतं —

११५ । १ मन्ता (B). २ कंपि (A), कम्पि (C). ३ जाणं (A). ४ धाणं (B). ५ ज (B). ६ गुरुप्पसाआ (B & C). ७ पिआमो (A & C). ८ मोखं (F). ९ च यामो (C). १० ११२ (A), ८२ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



णरेंद[1] एक्का तअणा[2] सुसज्जा
पओहरा कस्स गणा[3] मुणिज्जा ।
उविंद[4]बज्जा फणिराअ[5] दिट्ठा[6]
पढंति[7] छेआ सुह बस्स सिठ्ठा[8] ॥ ११६[9] ॥

---

तंचं णऊ—खलु निश्चयेनेति यावत् किंपि—किमपि ण—न जाणे—जानामि, झाणं च—ध्यानं च किंपि—किमपि णो—न जाने इति पूर्वेणान्वयः, किंतु मज्जं पिबामो—मद्यं पिबामः महिलं रमामो—महिलां रमामहे गुरुप्पसाओ—गुरुप्रसादात् कुल मग्ग लग्गा—कुलमार्गलग्नाः मोक्खं—मोक्षं वजामो—व्रजामः ॥ अनवरतमैथुनमद्यपानाद्यनेककुलपरंपरागमनकुकर्मात्यासक्ता अपि वयं गुरुप्रसादान्मोक्षं प्राप्नुम इति कापालिकभैरवानन्दस्य राजानं प्रति वाक्यमिदं कर्पूरमंजरीनाटकस्थम् । इंद्रवज्रा निवृत्ता । ८२ । (E).

११५ । यथा । मंत्रं न तंत्रं न खलु किमपि जाने ध्यानं च नो किमपि गुरुप्रसादात् । मद्यं पिबामो महिलां रमामो[महे] मोक्षं व्रजामः कौलमार्गलग्नाः ॥ (G).

११६ । नरेन्द्र एकस्तगणः सुसज्जः पयोधरः कर्णगणः ज्ञायते उपेन्द्रवज्रां फणिराजदिष्टां पठन्ति * * *॥ छेकाः विदग्धाः । (C).

---

११६ । १ णरिंद (E & F). २ तगणा (A). ३ गणं (A). ४ उपेंद (A), उबिंदु (B). ५ फणिराउ (A). ६ दिट्ठा (B & C). ७ पठन्ति (B). ८ सुकइंद दिठ्ठा (A), सुकइन्द सट्ठा (B), सुकइन्दसट्ठा (C). ९ ११४ (A), ८२ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, सुधम्म चित्ता गुणमंत[1]पुत्ता
सुकम्म रत्ता बिणआ कलंता[2]।
बिसुद्ध देहा धणमंत[3] गेहा
कुणंति के बब्बर सग्ग णेहा ॥ ११७[4] ॥ उबिंदबज्जा[5]।

११६। अथैकादशाचरचरणस्य वृत्तस्याष्टपंचाशदुत्तरत्रिशततमं ३५८ भेदम् उपेंद्रवज्रानामकं वृत्तं लक्षयति, णरिंदेति। यत्र प्रथमं एक्का—एकः णरिंद—नरेंद्रः मध्यगुरुर्ज्जगण इति यावत् ततः तअणा—तगणोऽंतलघुर्गण इत्यर्थः सुसज्जा—सु[सु]सज्जः शोभनीकृत्य स्थापित इति यावत्, ततश्च पओहरा—पयोधरो मध्यगुरुर्ज्जगण इत्यर्थः कस गणा—कर्णगणो गुरुद्वयमिति यावत् मुणिज्जा—ज्ञातः। तां फणिराअ दिट्ठा—फणिराजदृष्टां पिंगलोपदिष्टाम् इति यावत् सुह बस विट्ठा—शुभवर्णस्पृष्टां उबिंदबज्जा—उपेंद्रवज्रां छेआ—छइल्ला विदग्धा इति यावत् पढंति—पठंति ॥ अथवा नरेन्द्रैकतगणसुसज्जपयोधरकर्णगणाः मुणिज्जा—ज्ञायंते यत्र प्रतिचरणमिति शेषः इत्येकमेव पदं कृत्वा योजनीयम्। अत्र [सुसज्जमिति] शुभवर्णस्पृष्टामिति च पदं पद्यपूरणार्थमेवेति मंतव्यम्। ८३। (E).

११६। णरिंदेति। नरेंद्र एकस्तगणः सुसज्जः पयोधरः कर्णगणो ज्ञातव्यः। उपेंद्रवज्रां फणिराजदृष्टां पठंति छेकाः शुभवर्ण-

११७। १ गुणवन्त (C). २ करंता (A), कलत्ता (E). ३ धणवन्त (B). ४ ११५ (A), ८४ (E). ५ उपेंदवज्जा (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



इंद उविंदा[1] एक्क[2] करिज्जसु[3]
चउ अग्गल दह णाम मुणिज्जसु[4] ।
सम[5]जाइहिँ सम अक्खर दिज्जसु
पिंगल भण उवजाइहि[6] किज्जसु[7] ॥ ११८[8] ॥ [अलिल्ला]

---

स्पष्टं ॥ शुभेति मधुररस एव प्राशस्त्यसूचकः ॥ नरेंद्रो जगणः, पयोधरो जगणः, कर्णो द्विगुरुः । (G).

११७ । उदाहरति । स्वधर्मचित्ता गुणवन्तः पुत्राः स्वकर्मरतं विनीतं कलत्रं । विशुद्धो देहो धनवद्गेहं कुर्व्वते के वर्व्वराः स्वर्गस्नेहम् ॥ विशुद्धो रा[रो]गादिहीनः । (C).

११७ । उपेंद्रवज्रामुदाहरति, सुधम्मेति । सुधम्म चित्ता — सुधर्मचित्तं गुणमंत पुत्ता — गुणवत्पुत्रं सुकम्म रत्ता — सुकर्मरतं पत्यादिशुश्रूषाकर्मण्यासक्तमिति यावत् बिणआ — विनीतं कलत्ता — कलत्रं । बिसुद्ध देहा — रोगादिरहितः देहः धणमंत — धनवत् गेहा — गेहं, एतत्सर्वं यदि भवतीति शेषः, तदा के बब्बरा — वर्वराः सग्ग णेहा — स्वर्गस्नेहं कुणंति — कुर्वंति, अपि तु न कोऽपीत्यर्थः ॥ सर्वपदार्थविकलक[स्य] कस्यचिदिदं वाक्यम् । ८४ । उपेंद्रवज्रा निवृत्ता । (E).

११७ । यथा । सुधर्म चित्तं गुणवंतः पुत्राः सुकर्मरक्तं विनतं

---

११८ । This śloka is not found in (A) and (B). १ उपेन्द्रा (C). २ एक्क (C). ३ करीज्जसु (C). ४ धरिज्जसु (C). ५ सव (C). ६ इबजाइ (C), उपजाइ कहि (E). ७ सुणिज्जसु (C). ८ ८४ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



कलत्रं। विशुद्धा देहा धनवंतो गे[ग्ट]हाः कुर्वंति के वर्व्वराः स्वर्गे स्वेहम् ॥ विशुद्धा नीरोगाः। (G).

११८। इन्द्रोपेन्द्रावेकी क्रियेतां चतुरग्रदशनामानि ध्रियन्तां। सर्व्वजातिसमाचराणि * * पिंगलो भणति उपजातिर्ज्ञायताम् ॥ इन्द्रवज्रोपेन्द्रवज्राच्छन्दसोरेकीकरणादुपजातिच्छन्दो भवति, तच्च चतुर्द्दश नामानि भवन्ति, एवं सर्व्वजातिषु समाचरासु उपजातिर्बोध्यव्या। (C).

११८। अथेंद्रवज्रोपेंद्रवज्राभ्यां पादेन पादाभ्यां पादैस्त्रिभिर्मिश्रिताभ्यामुपजातिच्छन्दो भवति तच्च [च]तुर्दशविधमित्याह, इंदेति। इंद उविंदा — इंद्रोपेंद्रयोः नामैकदेशेनापि नामग्रहणादिंद्रवज्रोपेंद्रवज्रयोरित्यर्थः एक्क — ऐक्यं करिज्जसु — कुरुष्व, चउ अग्गल दह णाम — चतुरधिकदशनामानि मुणिज्जसु — जानीहि। सम अक्खर — समान्यचराणि दिज्जसु — ददस्व, सम जाइहि — समजातिभिः तुल्याचरचरणजातीयैर्वृत्तैरिति यावत् उपजाइहिँ — उपजातिं किज्जसु — कुरुष्व इति पिंगल — पिंगलो नागः भणति ॥ इदं तु बोध्यं समाचराणि दत्त्वा समजातीयैर्वृत्तैरुपजातिं कुरुष्वेत्यनेन विषमाचरचरणजातीयैर्वृत्तैर्नोपजातिरित्युक्तं भवति, तथाचेंद्रवज्रोपेंद्रवज्राभ्यां न त्विंद्र[वज्रेंद्र]वंशाभ्यामिंद्रवंशावंशस्थाभ्यां वातोर्मीशालिनीभ्यां न मालिनीशालिनीभ्यामुपजातिर्भवति इति परमार्थ इति। (E).

११८। इंदेति। इंद्रवज्रोपेंद्रवज्रे एकत्र कुरुष्व चतुरधिकदशनामानि जानीहि। समजातिभिः समाचराणि देहि पिंगलोभणति उपजातिं कुरुष्व ॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



चउ अक्खरके पत्थर[1] किज्जसु
इंद[2] उविंदा[3] गुरु लहु[4] बुज्झसु[5]। [अलिल्ला]
मज्झह[6] चउद[ह]ह हो उवजाइ
पिंगल जंपइ[7] कित्ति वेल्लाइ[8] ॥ ११९[9] ॥ [पज्झटिका ?]

---

११९। चतुर्दशानां ज्ञानप्रकारमाह, चतुरक्षरप्रस्तारं कुरुष्व इन्द्रोपेन्द्रयोर्गुरुलघून् बुध्यस्व। मध्ये चतुर्दश भवन्त्युपजातयः पिङ्गलो- जल्पति कृत्वा मन्यते ॥ अयमर्थः, चतुरक्षरस्य षोडश प्रस्ताराः भवन्ति, तत्र प्राथमिकश्चतुर्गुरुः स चेन्द्रवज्रायामन्तर्भूतः तत्र चतुर्षु पादेष्वाद्याक्षरस्य गुरुत्वादेव, अन्तिमश्चतुर्लघुर्भवति स चोपेन्द्रवज्राया- मन्तर्भूतः तत्र चतुर्षु पादेषु प्रथमाक्षरस्य लघुत्वात्, अतो मध्यवर्त्ति- चतुर्दशभेदानुसाराच्चतुर्दशोपजातयो भवन्ति। तथाहि चतुरक्षरस्य द्वितीयप्रस्तार आदिलघुर्भवति, तत्रापि प्रथमपादो लघ्वादिः परे त्रयो गुर्वादयः, एवमग्रेऽपि। (C).

११९। अथाषां चतुर्दशभेदानयनप्रकारमाह, चउ अक्खरेति। चउ अक्खरके — चतुरक्षराणां पत्थर — प्रस्तारं किज्जसु — कुरुष्व, इंद उविंदा — इंद्रोपेंद्रयोः गुरु लहू — गुरुलघू इंद्रवज्रायां गुरु- मुपेंद्रवज्रायां लघुमित्यर्थः बुज्झसु — बुध्यस्व। मज्झह — मध्ये सर्व- गुरु-सर्वलघुप्रस्तारयोरिति यावत् चउद्दह — चतुर्दश उवजाइ — उपजातयः हो — भवंति इति कित्ति वेल्लाइ — वेल्लितकीर्त्तिः

---

११९। १ पत्कर (A). २ इंदु (B). ३ उपेंदा (F). ४ लहु गुरु (A). ५ दिज्जसु (A), बुज्झसु (B & C), बुज्जसु (E). ६ मझ्झाहिँ (A), मज्झइ (B), मज्झउ (C). ७ परप्रस्तारं (E). ८ बोल्लाइ (A). ९ ११६ (A), ८५ (E).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पिंगलः जंपद्द — जल्पति॥ अत्रेदं तत्त्वं — चतुरचरस्य प्रस्तारक्रियया षोड़श भेदा भवंति, तत्र चतुर्गुरुः प्रथमः स चेंद्रवज्रापादचतुष्टयज्ञापकस्तत्र प्रतिचरणं प्रथमगुरोरुपादानात् तत्रैकैको गुरुरिंद्रवज्राया एकैकचरणज्ञापक इति हृदयं। चतुर्लघुश्चांतिमः स चोपेंद्रवज्रापादचतुष्टयज्ञापकस्तत्रै[कै]को लघुरुपेंद्रवज्राया एकैकचरणज्ञापक इति सहृदयैकगम्योऽर्थस्तत्र प्रतिचरणं प्रथमलघोरुपादानात्। एवं चावशिष्टा मध्ये चतुर्दशभेदास्तदनुसाराच्च चतुर्दशोपजातयो भवंति। तथाहि चतुरचरस्य द्वितीयप्रस्तारे प्रथममेको लघुस्तदनन्तरं च त्रयो गुरवो भवंति, तथा चोपेंद्रवज्रायाः प्रथमश्चरणः त्रयश्चेंद्रवज्राया एवं मिलित्वा प्रथमो भेदः। चतुरचरस्य तृतीयप्रस्तारे प्रथममेको [गुरुस्तत एको] लघुस्तदनंतरं गुरुद्वयं, तथा चेंद्रवज्रायाः प्रथमश्चरणो द्वितीयश्चोपेंद्रवज्रायाः तृतीयचतुर्थौ च पुनरिंद्रवज्राया एवं मिलित्वा द्वितीयो भेदः। चतुरचरस्य चतुर्थप्रस्तारे प्रथमं लघुद्वयं तदनंतरं गुरुद्वयं भवति, तथाच प्रथमद्वितीयौ चरणौ उपेंद्रवज्रायाः तृतीयचतुर्थौ चेंद्रवज्राया एवं मिलित्वा तृतीयो भेदः। एवमग्रेऽपि सुधीभिरवधेयमित्यस्मत्तातचरणोपदिष्टः पंथाः। (E).

११८। अथासां चतुर्दशभेदानयनप्रकारमाह चउरि[इ]ति। चतुरचरस्य प्रस्तारं कुरु, इंद्रवज्रोपेंद्रवज्रयोर्गुरुलघु बुध्यस्व। मध्ये चतुर्दश भवंति, उपजातिं पिंगलो जल्पति कीर्त्तिवेलायां॥ कीर्त्तिः प्रस्तारः, मध्ये — सर्वगुरुसर्वलघुप्रस्तारयोरंतराले। (G).

[Vide Ghosha's Compendium, Introduction, p. xix, para 45.—Ed.]

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, बालो[1] कुमारो[2] स छ[3]मुंडधारी
उप्पाउ[4] हीणा हउ[5] एक्क णारी ।
अहं णिसं[6] खाहि[7] विसं[8] भिखारी[9]
गई भवित्ती[10] किल का हमारी[11] ॥ १२०[12] ॥

१२० । उदाहरति । बालः कुमारः स षण्मुण्डधारी, उपायहीना अहमेका नारी । भर्त्ता तु भिक्षुकः सोऽपि अहर्न्निशं विषं खादति, अतः का गतिर्म्मम भवित्रीति शोचति पार्व्वती ॥ (C).

१२० । उपजातिमुदाहरति, बाल इति । कुमारः कार्त्तिकेयः बालः स छमुंडधारी — स च षण्मुण्डधारी, उप्पाउ हीणा — अर्ज्जनोपायविकला एक्क — एका अपरा असहाया णारी — स्त्री हउ — अहं, भिषा[खा]री — भिक्षुकस्त्वम् अहर्न्निशं विषं खाहि — भक्षयसि, अतः हमारी — अस्मदीया का गतिरवस्था किल निश्चयेन भवित्री ॥ षड्मुखधारिणो बालस्य बहुतरमत्यावश्यकं च भक्ष्यमपेक्षितमहं च निस्सहाया अर्ज्जनासमर्था स्त्री, त्वं चाहर्न्निशं विषभोजनेनैव स्वस्य तृप्तिमुत्पादयस्यतोऽस्मदीया का गतिर्भविष्यति तन्न जाने इति महादेवं प्रति पार्वतीवाक्यं । पूर्वार्द्धे

१२० । १ वालः (A), वाल (B). २ कुमारः (A), कुमारा (B). ३ छच (B). ४ उपाच (A), उवाच (B & C). ५ हुइ (B), हुवि (C). ६ णिसि (A), निसं (C). ७ खाइ (B & C). ८ विखं (A), विशं (E). ९ भिषारी (E). १० गतिर्भविची (A), गतिब्भविती (B & C). ११ हामारी (C). १२ ११७ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



कित्ती[१] बाणी माला साला हंसी माश्रा जाश्रा[२] बाला।
श्रद्दा भद्दा पेम्मा रामा रिद्धी बुद्धी तास्स णामा॥ १२१[३]॥
[विद्युन्माला ।] उबजाइ[४] ।

---

इंद्रवज्राया उत्तरार्द्धे चोपेंद्रवज्राया लक्षणसत्त्वाद्रामाख्या द्वादशीय-मुपजातिः । (E).

१२० । यथा । बालः कुमारः स षण्मुखधारी उपायहीनाहमेका नारी । अहर्निशं खादति विषं भिक्षुर्गतिर्भविता किल कास्माकं ॥ (G).

१२१ । चतुर्दश नामान्याह । कीर्त्तिर्वाणी माला शाला हंसी माया जाया बाला । आर्द्रा भद्रा प्रेमा [रामा] ऋद्धिर्बुद्धिः तासां नाम ॥ (C).

१२१ । अथासां नामान्याह, कित्तीति । निगदेनैव व्याख्यातं । अथासामस्मत्तातचरणनिर्म्मितानि क्रमेणोदाहरणानि यथा,—

दृढं धनुर्वामकरे दधानोऽवामे शरं स्वर्णविचित्रपुंखं ।
पृष्ठप्रदेशेऽक्षयि तूणयुग्मं बिभ्रत्स रामः शरणं ममास्तु ॥ १ ।
यस्यानुकम्पायुतदृष्टिपद्म-कटाक्षसंप्रेक्षित एव लोकः ।
सर्वापदब्धिं तरति प्रतूर्णं श्रीरामचंद्रः शरणं ममास्तु ॥ २ ।
यदीयपादाब्जपरागपातात् शिलामयी गौतमयोषिदाशु ।
कामस्त्रियोऽपि स्पृहणी[य]रूपं लेभे स रामः शरणं ममास्तु ॥३।

---

१२१ । १ किति (A). २ साश्रा (C). ३ ११८ (A), ८१ (E). ४ उप-जाति (A & B).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



सुग्रीववातात्मजमुख्यकीशै-र्बद्धाञ्जलीकैरुपसेव्यमानः ।
सुवर्णसिंहासनसंस्थितः स श्रीरामचंद्रः शरणं ममास्तु ॥ ४ ।
त्रिलोकसंपालनबद्धसंधः कारुण्यपीयूषमहांबुराशिः ।
स्वभक्तदुःखोद्धरणैकवीरः श्रीरामचंद्रः शरणं ममास्तु ॥ ५ ।
आजानुबाहुद्वितयः प्रबद्ध-यमासनस्थो धृतपीतवासाः ।
प्रफुल्लराजीवपलाशनेत्रः श्रीरामचंद्रः शरणं ममास्तु ॥ ६ ।
समस्तपृथ्वीपतिमौलिरत्न-प्रभाभिनीराजितपादपद्मं ।
अशेषगीर्वाणगणप्रगीत-कीर्त्तिं तमीशं प्रणतोऽस्मि रामं ॥ ७ ।
नानाविभूषामणिरश्मिजाल-प्रच्छन्ननीलाभ्रसमानगात्रः ।
सौंदर्य्यसंनाशितकामगर्वः स रामचंद्रः शरणं ममास्तु ॥ ८ ।
अरातिनारीहृदयं प्रविष्ट-स्तत्र स्थितान्दग्धुमिवारिवर्गान् ।
यस्य प्रतापप्रबलानलस्तु स रामचंद्रः शरणं ममास्तु ॥ ९ ।
स्वांकप्रसुप्तां धृतकांचनाभां समीक्ष्य सीतां कनकप्रभांगीं ।
आनंदितांतःकरणः स पाया-दपायतो मां रघुवंशकेतुः ॥ १० ।
अनन्यसाधारणकीर्त्तिचंद्र-करावधूताष्टदिगंधकारः ।
पौलस्त्यवंशद्रुमकालवह्निः स जानकीशः शरणं ममास्तु ॥ ११ ।
मत्वा भवंतं त्रिजगद्विपत्ति-संनाशकं देवगणान् विहाय ।
भवत्पदाब्जं शरणं गतोऽस्मि प्रसीद राम त्वमतोऽतिशीघ्रम् ॥१२।
भवत्समानोऽपि यदा नरेंद्रः श्रीराम कार्प्पण्यमुरीकरोति ।
तदाश्रयेत्कः खलु दातृभाव-मतस्त्वमीश त्यज निष्ठुरत्वं ॥ १३ ।
वीरासनाध्यासित उग्रवीर्यो नवाम्बुदश्यामरुचिर्ज्जितारिः ।
समस्तविद्याम्बुधिपारगश्च स रामचंद्रः शरणं ममास्तु ॥ १४ । (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



चारी[1] कसा[2] पाए दिसा सव्वा सारा[3]
पात्रा अंते[4] दिज्जे कंता[5] चारी हारा ।
छसावेत्रा मत्ता पत्ता चारी पात्रा
बिज्जाहारा जंपे सारा णात्राराश्रा ॥ १२२[6] ॥*

---

[For examples of Upajáti, culled from the Kumárasambhava of Kálidása, vide Ghosha's Compendium, pp. 118-119.—Ed.]

१२१। कित्तीति। कीर्त्तिर्वाणी माला शाला हंसी माया जाया बाला। आर्द्रा भद्रा प्रेमा रामा ऋद्धिर्बुद्धिरिति तासां नामानि ॥ (G).

१२२। अथ द्वादशाचरा। चत्वारः कर्णाः पादे दत्ताः सर्वसाराः पादान्ते दत्ताः कान्तास्वत्वारो हाराः। षसवति-मात्राः प्राप्ताः चतुर्भिः पादैर्विद्याधरं जल्पति सारं नाग-राजः ॥ प्रतिपादं चतुर्विंशतिमात्रत्वाच्चतुर्भिः पादैः षसवति-र्मात्राः स्युः। (C).

१२२। अथ द्वादशाचरचरणस्य वृत्तस्य षसवत्युत्तरं सहस्र-चतुष्टयं भेदाः ४०९६ भवंति, तत्राद्यं भेदं विद्याधरनामकं वृत्तं लचयति, चारीति। यत्र पाए—पादे सव्वा सारा—सर्वसारान् सर्वसारं वा चारी कसा—चतुरः कर्णान् कर्णचतुष्टयं वा गुरु-द्वयात्मकगणचतुष्टयमिति यावत् दिसा—दत्त्वा, पात्रा अंते—

---

१२२। १ चारि (A), चाकी (C). २ वर्णा (F). ३ हारा (A). ४ अंता (A). ५ कसा (A), कंवे (C). ६ ११९ (A). * Second half dropt in (B).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, *जासु कंठा[1] बीसा दीसा[2] सीसा[3] गंगा
णाआराआ किज्जे हारा गोरी[4] अंगा ।
गंते[5] चामा[6] मारू कामा लिज्जे[7] कित्ती
सोई[8] देऊ[9] सुक्खं[10] देओ[11] तुम्हा[12] भत्ती[13] ॥
१२३[14] ॥ विद्याधरः[15] ।

पादांते कंता—कांताः चारी हारा—चत्वारो हारा गुरवः दिज्जे—दीयंते । तं छण्णवेआ मत्ता पत्ता चारी पाआ—षण्णवतिमात्राप्राप्तचतुष्पादं प्रतिपादं चतुर्विंशतिमात्राणां विद्यमानत्वात् षण्णवतिमात्रां प्राप्ताश्चत्वारः पादा यस्य तत्तादृशमिति यावत् सारा—द्वादशाक्षरचरणवृत्तमध्ये आदिभूतत्वात् सा[र]-भूतं श्रेष्ठमिति यावत् तं विज्जाहारा—विद्याधरं विद्याधर-नामकं वृत्तं णाआराआ—नागराजः जंपे—जल्पति ॥ अत्र वर्णवृत्ते मात्राकथनस्यानतिप्रयोजनकत्वान्मात्राज्ञापकस्वरणः सव्वा-सारेति कर्ण[वि]शेषणं [च] पद्यपूरणार्थमेवेति मंतव्यं, द्वादशगुरु-रचितचरणो विद्याधर इति फलितार्थः । (E).

१२२ । अथ द्वादशाक्षरं जगतीच्छंदः । चारीति । चत्वारः कर्णाः पादे दत्ताः सर्वसाराः पादांते देयाः कांताश्चत्वारो

१२३ । * Dropt up to हारा in the 2nd quadrant in MS. (B).
१ कंठे (A). २ दिट्ठा (C). ३ सीसे (A). ४ गौरी (F). ५ गव्वे (A, B & C).
६ वामा (A & B), रामा (C). ७ णिज्जे (C). ८ सोऊ (A). ९ देवो (E).
१० मोक्खा (A), सोक्खं (B & C). ११ देऊ (A). १२ च्छा (A), तुम्मा (C).
१३ सत्ती (A), भङ्गी (B). १४ १२० (A). १५ विद्याधरा (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



धओ[1] चामरो रूअओ सेस सारो[2]
ठए कंठए मुद्दए जत्थ[3] हारो ।
चउ च्छंद किज्जे तहा सुद्ध देहं
भुअंगापआअं पए बीस रेहं ॥ १२४[4] ॥

---

हाराः । षण्णवतिमात्राप्राप्तास्त्वारः पादाः, विद्याधरं जल्पति सारो नागराजः ॥ कर्णो द्विगुरुः, हारो गुरुः । (G).

१२३ । उदाहरति । यस्य कण्ठे विषं दृश्यते शीर्षे गङ्गा नागराजः कृतो हारः गौरी अङ्गे । गर्व्वितो रामः प्रतिकूलमारितः कामः गृहीता कीर्त्तिः स देवः सुखं ददातु युष्माकं भक्त्या ॥ (C).

१२३ । विद्याधरमुदाहरति, जासू इति । जासू—ज[य]स्य कंठा—कंठे वीसा—विषं दीसा—दृश्यते, सीसा—शीर्षे गंगा दृश्यते, अंगा—अंगे अर्द्धांगे इति यावत् गोरी—गौरी पार्वतीत्यर्थः दृश्यते, येन णाआराआ—नागराजः हारः कंठभूषा किज्जे—क्रियते कृतो वा । गंते—गात्रे चामा—चर्म करिकृत्तिरिति यावत् धृतमिति शेषः, येन च कामा—कामं मारू—मारयित्वा दग्ध्वेति यावत् कित्ती—कीर्त्तिः लिज्जे—गृहीता, सोई—स एव देओ—देवः शशिकलाभरण इत्यर्थः भत्ती—भक्त्या तुम्हा—युष्मभ्यं सुक्खं—सुखं निरतिशयानन्दमिति यावत् देओ—ददातु ॥ विद्याधरो निवृत्तः । (E).

---

१२४ । १ धओ (A). २ राओ (C). ३ जतह (A). ४ १२१ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१२३ । यथा । यस्य कंठे विषं दृश्यते शीर्षे गंगा नागराजाः क्रियंते हाराः गौरी अंगे । गात्रे चर्म मारितः कामो गृहीता कीर्त्तिः सोऽपि देवः सुखं ददातु युष्माकं भक्त्या ॥ (G).

१२४ । ध्वजं चामरं रूपकं शेषसारः स्थाप्यते कण्ठे मुग्धे-यथा हारः । चतुश्छन्दः क्रियते तथा शुद्धदेहं भुजंगप्रयातं पादे विंशतिरेखं ॥ ध्वज आदिलघुस्त्रिकलः, चामरं गुरुः, रूपकं छन्दः, शेषो नागः पिङ्गल एव तस्य सारः । चतुश्छन्दश्चतुर्गणं तेन चतुर्भिर्गणैश्छन्द इत्यर्थः । विंशतिरेखं विंशतिकलं । (C).

१२४ । अथैका[यद्वा]दशाक्षरचरणस्य वृत्तस्य षडशीत्युत्तर-पंचशततमं ५८६ भेदं भुजंगप्रयातनामकं वृत्तं लक्षयति, धअो इति । हे मुद्ध — हे मुग्धे यत्र धअो — ध्वजो लघ्वादिस्त्रिकलः चामरो — चामरं गुरुः एवं चउ — चत्वारः रूअओ — रूपकाः गणा इति यावत् पए — पदे प्रतिचरणमित्यर्थः किज्जे — क्रियंते तत्पदे इत्यनुषंजनीयं बीस रेहं — विंशतिरेखं विंशतिः रेखाः मात्रा यत्र तादृशमित्यर्थः शुद्धदेहं भुअंगापआअं — भुजंगप्रयातं छंद — छन्दः सेस — शेषेण पिंगलेन जत्थ — यथा हारो — हारः मुक्तादाम तहा — तथा कंठए — कंठे ठए — स्थाप्यते । केचित्तु धअो — ध्वजः लघ्वादिस्त्रिकल इति यावत् ततः चामरो — चामरं गुरुरिति यावत् रूअओ — एवं रूपेण चउ — चतुर्भि-र्गणैर्यत्र चरण इति शेषः सारो — सारः श्रेष्ठ इति यावत् सेस — शेषः संपूर्ण इत्यर्थः तहा — तथा किज्जे — क्रियते पूर्य्यते इति यावत्, पए बीस रेहं — पदे विंशतिरेखं शुद्धदेहं दृष्टवनिकया



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



**अहिगण[1] चारि पसिद्धा सोलह चरणेण पिंगलो भणइ[2] ।
तीणि[3] सआ बीसग्गल[4] मत्ता संखा[5]समग्गाइं ॥ १२५[6] ॥**

[गाहा]

समीकृतगणं तत् भुअंगापआअं — भुजंगप्रयातं छन्दः, तथा कथमित्याह, ठए इति, जत्थ — यथा मुद्धए — मुग्ध[या] कंठए — कंठे हारः मुक्तादाम ठए — स्थाप्यते इत्याद्यः । अत्र ठए इति द्वितीयस्वरणः मात्राकथनं च पद्यपूरणार्थमेवेति मंतव्यं, यग[ण]-चतुष्टयरचितचरणं भुजंगप्रयातमिति फलितोऽर्थः । (E).

१२४ । धअ[ओ] इति । ध्वजश्चामरं रूपकाः संसारे स्थाप्यते कंठे मुग्धया यथा हारः । चत्वारः छंदः क्रियते तथा शुद्धदेहं भुजंगप्रयातं पदे विंशतिरेखं ॥ ध्वजो लघ्वादिस्त्रिकलः, चामरं गुरुः, एवंरूपास्त्वारो गणाः पदे कार्या इत्यर्थः । शुद्धेति श्लोचादिप्राशस्त्यं सूचितं । यथा मुग्धया हारः कंठे ध्रियते तथा श्लेषेणेत्यर्थः । (G).

१२५ । एतस्यैव विशेषान्तरमाह । अहिगणास्त्वारः प्रसिद्धाः षोड़शचरणैः पिङ्गलो भणति । त्रीणि शतानि विंशत्यधिकानि मात्रासंख्याः स[म]ग्राणि ॥ अहिगण आदिलघुः पञ्चकलः, षोडश-चरणैरेतादृशैर्भुजङ्गप्रयातं पिङ्गलो भणति, समग्रैः षोडशचरणैर्-विंशत्यधिकशतद्व[त्र]यमात्रा भवन्तीत्यर्थः । (C).

१२५ । १ अभिगण (F). २ कहइ (A). ३ तिषि (A & C), भिण (B). ४ वीसग्गा (A). ५ सक्खा (C). ६ This śloka comes after १२६ in MSS. (A, B & C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



अहा, महा मत्त माअंग[1] पाए ठवीआ
तहा तिक्ख[2]बाणा कडक्खे[3] धरीआ ।
भुआ[4] पास[5] भोहा[6] धणूहा[7] समाणा
अहो णाअरी कामराअस्स सेणा[8] ॥ १२६[9] ॥

भुअंगपआतं । (C).

---

१२५ । अथास्यैव प्रकारांतरं गाथया वदति, अहिगणेति पसिद्धा — सर्वत्र छंदोग्रंथे प्रसिद्धाः चारि — चत्वारः अहिगण — अहिगणाः पञ्चकलाः यगणा इति यावत् यत्र प्रतिचरणं पतंतीति शेषः, बीसग्गल — विंशत्यधिकानि तीणि सआ — त्रीणि शतानि समग्गाइं — समग्रा मत्ता संखा — मात्रासंख्या यत्र भवतीति शेषः, सोलह चरणेण — षोडशचरणेन उपलक्षितं तत् भुजंगप्रयातनामकं वृत्तमिति शेषः पिंगलो — पिंगल इति भणइ — भणति ॥ श्लोक-चतुष्टयस्यैकः श्लोकः कर्त्तव्य इति फलितार्थः॥ (E).

१२५ । गाथयास्यैव प्रकारांतरमाह, अहीति । अहिगणाश्चत्वारः प्रसिद्धाः षोड़शचरणेन पिंगलो भणति । त्रीणि शतानि विंश-त्यधिके[कानि] मात्रासंख्या समग्रा ॥ अहिगणो यगणः । (G).

१२६ । उदाहरति । महामत्तमातङ्गः पादे स्थापितः तथा तीक्ष्णवाणाः कटाक्षे धृताः । भुजः पाशः भ्रुवौ धनुःसमाने अहो नागरी कामराजस्य सेना ॥ (C).

---

१२६ । १ मातङ्ग (C). २ तिक्क (C). ३ कलक्खे (B & C). ४ भुजा (F). ५ फास (E & F). ६ भौंहा (A), भोंम्हा (B & C). ७ धणूहा (B & C). धणूसा (F). ८ सणा (E). ९ १२२ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



हार गंधा तहा कस्स[1] गंधा उणो
कस्स सद्दा[2] तहा तो[3] गुरूश्रा गणो[4] ।
चारि[5] जोहा गणा णाश्र राश्रा भणो[6]
एहु[7] रूएण लच्छीहरो[8] सो मुणो[9] ॥ १२७[10] ॥

---

१२६ । भुजंगप्रयातमुदाहरति, महामत्तेति । यस्याः पाए — पादे महामत्तमातंगः ठवीश्रा — स्थापितः, तहा — तथा यस्याः कडक्खे — कटाक्षे तिक्ख वाणा — तीक्ष्णवाणाः धरीश्रा — धृताः । यस्याः भुश्रा — भुजयोः फास — पाशो धृत इति पूर्व्वेणान्वयः, यया च भोंहा — भ्रुवोः धणूहा — धनुः धृतमिति पूर्व्वेणान्वयः, सेयं नागरी श्रहो इत्याश्चर्य्ये कामराश्रस्स — कामनृपतेः [समाणा] — समाना त्रिभुवनविजयेनातिगर्व्विता सेणा — सेनैव सेनेति भावः ॥ यद्वा पादस्थापितमहामातंगा कटाक्षा एव धृतास्तीक्ष्णवाणाः यया सेत्यर्थः, भुजपाशा भुजैव पाशो यस्याः सेत्यर्थः, धनुःसमानभ्रूका नागरी कामनृपतेः सेनेव भातीति शेष इति योजनीयं । पूर्व्वापरशब्दव्यत्यासस्तु प्राकृतभाषायां न दोषायेति मंतव्यम् । भुजंगप्रयातं निवृत्तम् । (E).

१२६ । भुजंगप्रयातं यथा । महामात्रा मातंगाः पादे स्थापितास्तथा तीक्ष्णवाणाः कटाक्षे धृताः । भुजा पाशो भ्रूर्धनुषा समाना, श्रहो नागरी कामराजस्य सेना ॥ (G).

---

१२७ । १ पस्स (B). २ सद्दा (C). ३ तहा रा (A), तथारा (B & C). ४ रण (B). ५ धारी (F). ६ भणे (A, B & C). ७ एष (A). ८ लच्छीहर (C), लच्छीधरो (F). ९ सुणे (C). १० १२४ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१२७। हारगन्धौ तथा कर्णगन्धौ पुनः कर्णशब्दौ तकारो-गुरुको गणः। चत्वारो योधगणा नागराजो भणति एतद्रूपेण लक्ष्मीधरो ज्ञायते॥ हारो गुरुः, गन्धः शब्दश्च लघुः, कर्णा-द्विगुरुः, तकारोऽन्तलघुको गणः, गुरुको गण एकः। चत्वारो योध-गणा इत्यनेन उक्तार्थ एव स्पष्टीकृतः, योधो मध्यलघुः पञ्चकलः। (C).

१२७। अथ द्वादशाचर[चर]णवृत्तस्यैकसप्तत्युत्तरैकादशशततमं ११७१ भेदं लक्ष्मीधरनामकं वृत्तं लक्षयति, हार गंधेति। हार गंधा—हारगंधौ गुरुलघू इति यावत् तहा कण्ण गंधा—तथा कर्णगंधौ कर्णो गुरुद्वयात्मको गणः गंधो लघुस्ताविरयर्थः उणो—पुनः कण्ण सद्दा—कर्णशब्दौ गुरुद्वयात्मकगणलघू इति यावत् तहा तो—तथा तोऽंतलघुस्तगण इत्यर्थः गुरुआ गणो—गुरुक-गणः। एऊ रूएण—एवं रूपेण एतावदुपादानविधिनेति यावत् चारि जोहा गणा—चत्वारो योद्धृगणा रगणा इति यावत् यत्र प्रतिचरणं पतंतीति शेषः, सो—सः लच्छीहरो—लक्ष्मीधरः मुणो—ज्ञातव्यः, इति णाअराआ—नांगराजः पिंगल इति यावत् भणो—भणति॥ रगणचतुष्टयरचितचरणं लक्ष्मीधरनामकं वृत्तं ज्ञातव्यमिति फलितार्थः। अत्र रगणचतुष्टयोट्टवनिकाप्रकारः पूर्वार्द्धेणोक्तमिति ध्येयम्। (E).

१२७। हारेति॥ हारगंधौ तथा कर्णगंधौ पुनः कर्णशब्दौ तथा तगणो गुरुको गणः। चत्वारो योद्धृगणा नागराजो भणति एवं रूपेण लक्ष्मीधरस्तः॥ हारो गुरुः, गंधो लघुः, कर्णो द्विगुरुः, शब्दो लघुः। एवं चत्वारो रगणाः। (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, भंजिआ मालबा गंजिआ कस्सला[1]
जिस्सिआ[2] गुज्जरा[3] लुंठिआ[4] कुंजरा[5] ।
बंगला भंगला ओड्डिआ[6] मोड्डिआ[7]
मेच्छआ[8] कंपिआ कित्तिआ थप्पिआ ॥ १२८[9] ॥
लक्ष्मीधरः[10] ।

---

१२८ । उदाहरति । भञ्जिता मालवा गञ्जिताः कर्णाटाः जिता गुर्ज्जरा लुण्ठिताः कुञ्जराः । वङ्गा भग्ना ओड़ा मोटिताः म्लेच्छाः कम्पिताः कीर्त्तिः स्थापिता ॥ कर्णेनेत्यध्याहार्य्यम् । (C).

१२८ । लक्ष्मीधरमुदाहरति, भंजिआ इति । मालवा—मालवदेशाधिपतयो राजानः भंजिआ—भंजिता भग्ना इति यावत्, कस्सला—कर्णाटाः कर्णाटदेशीया राजान इति यावत् गंजिआ—गंजिता मारिता इति यावत्, लुंठिआ कुञ्जरा—लुंठितकुंजराः लुंठिताः बलाद्गृहीताः कुंजरा हस्तिनो येषां तादृशा इत्यर्थः गुज्जरा—गुर्ज्जरदेशीया राजानो जिस्सिआ—जिताः । बंगला—वंगाः भंगला—पलायिताः, ओड्डिआ—ओड्रदेशीया राजानः मोड्डिआ—मोटिताः, मेच्छआ—म्लेच्छाः कंपिआ—कंपिताः, कित्तिआ—कीर्त्तयः थप्पिआ—स्थापिताः ॥ स रामो जयतीति प्रबंधेन युज्यते । लक्ष्मीधरो निवृत्तः । (E).

---

१२८ । १ काणला (A), काणडा (B & C). २ जीणिआ (A & C), जीषिआ (B). ३ गुञ्जरा (B & C). ४ लूलिआ (A, B & C). ५ पिंजरा (A), कुञ्जरा (E). ६ कड्डिआ (A), उड्डिआ (C). ७ मुंडिआ (A), मुड्डिआ (B & C). ८ मिच्छआ (E). ९ १२५ (A). १० लक्ष्मीधरा (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



सगणा[1] ध्रुव[2] चारि पलंति जही[3]
भण[4] सोलह मत्त बिराम कही ।
तह पिंगलिअं[5] भणिअं उचिअं[6]
इअ तोटअ[7] छंद बरं रइअं[8] ॥ १२९[9] ॥

१२८ । यथा । भंजिता मालवाः गंजिताः कर्णाटका जिताः गुर्ज्जरा लुंठिताः कुंजराः । वंगा भंगिता श्रोड्रदेशा मोटिताः म्लेच्छाः कंपिताः कीर्त्तयः स्थापिताः ॥ (G).

१२९ । सगणा ध्रुवाश्चत्वारः पतन्ति यत्र गणषोडशमात्राभिर्विरामस्तत्र । तथा पैङ्गलिकैर्भणितम् उचितमिति तोटकच्छन्दवरो रचितः ॥ सगणचतुष्केण षोडशमात्राकथनं स्पष्टार्थमेव, विरामः पादसमाप्तिः । (C).

१२९ । अथ द्वादशाक्षरचरणस्य वृत्तस्य पंच[षट्]पंचाशदधिकसप्तदशशततमं १७५५ [१७५६] भेदं तोटकनामकं वृत्तं लक्षयति सगणेति । जही — यत्र चारि चत्वारः सगणा गुर्वंतगणाः ध्रुव — ध्रुवं पलंति — पतंति, सोलह मत्त विराम कही — षोडशमात्राकथितविरामं षोडशमात्रासु कथितो विरामो विच्छेदो यस्मिंस्तदित्यर्थः । तह — तथा रइअं — रचितं पिंगलेनेति यावत् छंद वरं — छंदःश्रेष्ठं इअ — एतत् तोटअ — तोटकं भण — कथय

१२९ । १ सश्रणा (A). २ धुश्र (A, B & C). ३ जिही (F). ४ पश्र (A), गण (B & C). ५ पिंगलश्रं (A & C). ६ Dropt in (B). ७ तोडउ (B), तोडश्र (C). ८ बचिरं (B), रचिश्रं (C). ९ १२६ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, चल[1] गुज्जर[2] कुंजर[3] तेज्जि[4] मही[5]
तुअ[6] बब्बर जीवण[7] अज्जु[8] णही ।
जइ कुप्पिअ[9] कण्ण णरेंद बरा
रण[10] को हरि[11] को[12] हर बज्जहरा[13] ॥ १३०[14] ॥
तोटकं ।

---

इति पिंगलिअं—पिंगलीयैः पिंगलप्रयुक्तच्छंदःशास्त्राभिज्ञैरिति यावत् उचिअं—उचितं भणिअं—भणितं ॥ (E).

१२९ । सगेति । सगणा ध्रुवं चत्वारः पतंति यत्र भण षोडश-मात्राविरामः कथितः । तथा पिंगलीयैर्भणितम् उचितमेत-त्तोटकं छंदोवरं रचितम् ॥ (G).

१३० । उदाहरति । चल गुर्ज्जर कुञ्जरांस्त्यक्त्वा तत्र तव वर्व्वर जीवनमद्य नास्ति । यदि कुप्यति कर्णनरेन्द्रवरो रणकेशरी कोहरराज्यहरः ॥ कोहरो राज्यभेदः । (C).

१३० । तोटकमुदाहरति, चलेति । हे बब्बर—बर्व्वर गुज्जर—गुर्ज्जराधीश तुअ—तव जीअ[व]ण—जीवनं अज्जु—अद्य णही—नास्ति, अतः कुज्जर—कुंजरान् मही—महीं तेज्जि—त्यक्त्वा चल—गच्छ त्वमिति शेषः । कथं जीवनं नास्तीत्यत आह

---

१३० । १ जल (C). २ गुञ्जर (B). ३ कुञ्जर (E). ४ तज्जि (A). ५ दही (A, B & C). ६ तुह (B), रुह (F). ७ जिव्वण (B & C). ८ घज्ज (B). ९ कोप्पिअ (A), कोप्पइ (B & C). १० णर (A). ११ के हरि (A), dropt in (B), केसरि (C). १२ के (A). १३ वज्जधरा (A). १४ १२७ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जा[१] चारि तक्कार संभेअ उक्किठ्ठ[२]
सारंगरूअक्क सो पिंगले दिठ्ठ[३] ।
जा तीअ[४] बीसाम[५] संजुत्त पाएहि
णा जाणिए कंति[६] अस्रोस[७] भाएहि[८] ॥ १३१[९] ॥

---

जईति । कस्स णरेंद वरा — कर्णनरेंद्रवरः जइ — यदि कुप्पिअ — कुपितस्तदेति शेषः रण — रणे को हर — को हरः को हरि — को हरिः कः बज्जहरा — वज्रधरः ॥ गुर्ज्जरजयार्थप्रयातकर्णनरपतिप्रतियुद्धाय समुपस्थितं गुर्ज्जरदेशाधिपतिं प्रति कस्यचिद्बंदिजनस्यैतद्वचनम् । तोटकं निवृत्तम् । (E).

१३० । यथा । चल गुर्जर कुंजरान् त्यक्त्वा महीं तव बर्ब्बर जीवनमद्य न हि । यदि कुपितः कर्णनरेंद्रवरो रणे को हरिः को हरवज्रधरौ ॥ (G).

१३१ । यश्चतुस्तकारसम्भेदेनोत्कृष्टं सारङ्गरूपकं तत् पिङ्गलेन दृष्टं । त्रयो[ये] विश्रामाः संयुक्तपादैर्न ज्ञायते कान्तिरन्योन्यभागैः ॥ संभेदः सम्बन्धः, उत्कृष्टम् उत्कर्षः सुश्राव्यत्वं, रूपकं छन्दः, संयुक्ताक्षरप्रधानपादैर्विशिष्टं, विश्रामो यतिः, कान्तिः सा केनापि [न] ज्ञायत इत्यर्थः । (C).

१३१ । अथ द्वादशाक्षरचरणस्य वृत्तस्य एकचत्वारिंशोत्तरत्रयो-

---

१३१ । १ जं (A). २ उक्किट्ट (B & C). ३ दिट्ट (B & C). ४ तीणि (A). ५ विस्साम (B & C). ६ कित्ति (E). ७ असेस (A). ८ भाएण (A), हाएहि (C). ९ १२८ (A).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, रे गोड[१] थक्कंति[२] ते हत्थि[३] जूहाइ[४]
पल्लट्टि जुज्झंतु[५] पाइक्क बूहाइ[६] ।
कासीस राआ सरासार अग्गे ण[७]
की हत्थि[८] की पत्ति की बीर बग्गेण ॥ १३२[९] ॥
सारंग[रूपकं] ।

---

विंशतिशततमं २३४१ भेदं सारंगरूपकनामकं वृत्तं लक्षयति, जा चारीति। यत् चारि तक्कार संभेअ उक्किट्ठ — चतुस्तकारसंभेदोत्कृष्टं चतुस्तकाराणां चतुर्णामंतलघुतगणानां यः संभेदः संबंधस्तेनोत्कृष्टं सुश्राव्यत्वाद्युत्कर्षयुक्तमित्यर्थः, यत् पाएहि — पादेषु तीअ बीसाम संजुत्त — तृतीयविश्रामसंयुक्तं तत्र तृतीयाक्षरे यतिस्तादृशमित्यर्थः अण्णोण्ण भाएहि — अन्योन्यभागैः परस्परविच्छेदैरिति यावत् यस्येति शेषः कंति — कांतिः ण जाणिए — न ज्ञायते, सो — तत् पिंगले दिट्ठ — पिंगले दृष्टं सारंगरूअक्क — सारंगरूपकं तत्सारंगरूपकनामकं वृत्तमित्यर्थः ॥ अत्र चतुर्थस्वरणः पद्यपूरणार्थमेवेति मन्तव्यम् । (E).

१३१। जेति। यत्र चतुस्तगणसंभेद उत्कृष्टः सारंगरूपकः

---

१३१। १ गउड (A), गोल्ल (B & C), गौड (E). २ थक्कंतु (A & C), थक्कप्पु (B). ३ हत्थि (A), हत्थी (E), हत्थ (F). ४ जूथाइँ (A), जूहाच्चि (B), जूथाइ (C), वूहाइ (E & F). ५ वज्जण (A), वज्जन्तु (B & C), मुझ्झंतु (E). ६ जूथाइ (A), जूहाइ (C). ७ जग्गेण (C). ८ हत्थि (A), हत्ति (B). ९ १२९ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



पओहर चारि पसिद्धह ताम[1]
ति तेरह[2] मत्तह मोत्तिअ[3]दाम ।
ण पुव्वहि[4] हारु[5] ण दिज्जइ[6] अंत
बिह्न सअ अग्गल छप्पण[7] मत्त ॥ १३३[8] ॥

---

पिंगलेन दृष्टः। यः तृतीये विश्रामसंयुक्तः पादेषु न ज्ञायते कांतिरन्योन्यभागैः ॥ उल्लष्टत्वं आव्यत्वादिना । (G).

१३२ । उदाहरति । रे गौड़ तिष्ठन्तु ते हस्तियूथानिं परावृत्य व्रजन्तु पदातियूथानि । काशीशराजशरासाराग्रे किं पत्तिभिः किं हस्तिभिः किं वीरवर्गेण ॥ अत्र जयस्यासम्भावितत्वात् किं हस्त्यश्वादिना, तथाच पलायनं युक्तमिति व्यज्यते । (C).

१३२ । सारंगरूपकमुदाहरति, रे गौडेति । रे गौड — रे गौडदेशाधीश ते हत्थि बूहाइ — हस्तिव्यूहानि[?] थक्कंति — श्राम्यंति, अत इति शेषः पाइक्क बूहाइ — पदातिव्यूहानि पलट्टि — परावृत्य जुझ्झंतु — युध्यंतु[ताम्] नाम, तथापीति शेषः कासीस राआ सरासार अग्गे — काशीश्वरराजशराऽऽसाराग्रे दिवोदासवाणधाराग्रे इति पाठश्च, ण — ननु निश्चयेन को हत्थि — किं हस्तिभिः को पत्ति — [किं] पत्तिभिः को वीर वग्गेण — किं वीरवर्गेण ॥ (E).

१३२ । यथा । रे गौड श्राम्यंति ते हस्तियूथानि परावृत्य

---

१३३ । १ जाम (E & F). २ तेमह (B). ३ मोत्तिस (B). ४ पूव्वे (B), पूव्व (C). ५ हार (B, C & E). ६ दिज्जहि (A & B). ७ छप्पस (B). ८ १२० (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



युध्यंतु[ताम्] पत्तिव्यूहाः। काशीशराजशरासाराग्रे किं हस्तिभिः किं पत्तिभिः किं वीरवर्गेण॥ दिवोदासखड्गाग्रे सर्वे तृणप्राया-इत्यर्थः॥ (G).

॥ १२३। पयोधरैश्चतुर्भिः प्रसिद्धैर्युक्तं त्रिचयोदशमात्राभिः मौक्तिकदाम। न पूर्व्वस्मिन् हारो न दीयते अन्ते दिशते अग्रे षट्पञ्चाशन्मात्राः॥ अधिकास्त्रयोदश त्रिचयोदश, अत्र च आद्यन्तयोर्गुरुरहितत्वेन जगण एवोक्तः, तथाच पयोधरशब्दोऽर्थस्पष्टीकरणार्थमेवेति। यद्वा, आद्यन्तगुरुरहित-षोडशमात्रिक-पादषोडशकेनापि मौक्तिकदामच्छन्दो भवतीति ज्ञापनार्थं। न चैवं मात्रावृत्त एवोपन्यासः स्यादिति वाच्यं, द्वादशाक्षरनियमस्यैव विनिगम[क]त्वात्, षोड़शपादैः षट्पञ्चाशदधिकशतद्वयं मात्रा भवन्ति। (C).

१२३। अथ द्वादशाक्षरचरणस्य वृत्तस्य षड्विंशत्युत्तरैकोनविं[त्रिं]शततमं २९२६ भेदं मौक्तिक[दाम]नामकं वृत्तं लक्षयति, पओहरेति। जाम — यन्मध्ये ति तेरह मत्तह — त्रिचयोदशमात्राभिः षोड़शभिर्मात्राभिरिति यावत् उपलक्षिताः चारि — चत्वारः पओहर — पयोधरा मध्यगुरुका जगणा इति यावत् प्रसिद्धाः भवंतीति शेषः, यत्र ष अंत — अंते पादान्ते इत्यर्थः पुव्वहि — पूर्वं पादादावित्यर्थः हार — हारो गुरुः ण दिज्जे — न दीयते, बिह्न सअ अग्गल छप्पण मंत — द्विशताधिकषट्पंचाशन्मात्राकं तत् मोत्तिअ-दाम — मौक्तिकदामनामकं वृत्तमित्यर्थः॥ ननु यत्र पयोधरचतुष्टयं पततीत्युक्त्यैव पादाद्यंतयोर्गुरुदानाप्रसक्तेः कथं ण पुव्वहीत्यनेन तत्र तत्प्रतिषेधः साधु संगच्छत इति चेत्, अत्र केचित् यत एवं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, कआ भउ[1] दुब्बरि[2] तेज्जि[3] गरास
खणे खण[4] जाणिअ अच्छ[5] णिसास ।
कुहू रव तार[6] दुरंत बसंत
कि णिद्दअ[7] काम कि णिद्दअ[7] कंत[8] ॥ १३४[9] ॥
मौक्तिकदाम ।

---

चत्वारो जगणाः पतंतीत्यत एव पूर्व्वम् अंते वा हारो न दीयत-इति पूर्वोक्तस्यैव विवरणमेतदित्याहुः । षट्पञ्चाशदुत्तरशतद्वय-मात्राकथनं षोडशचरणाभिप्रायेण, जगणमात्राज्ञापकं तद्विशेषण-पदं पादपूरणार्थमेवेति मंतव्यम् । (E).

१३३ । पओ इति । पयोधराश्चत्वारः प्रसिद्धाः यत्र त्रित्रयो-दश मात्रा मौक्तिकदाम । न पूर्वं हारो न दीयते अंते द्विशता-धिकषट्पंचाशन्मात्रं॥ त्रित्रयोदश षोड़शेत्यर्थः, द्विशतेत्यनेनास्य षोड़शचरणता भवतीत्युक्तं, पयोधरो जगणः । (G).

१३४ । उदाहरति । कायो भरः दुर्ब्बलस्त्यक्ता ग्रासं चणे चणे ज्ञायते अस्ति[च्छ]निश्वासः । कुहूरवस्तापयति दुरन्तो वसन्तः * * * किं निर्दयः कान्तः ॥ दुर्ब्बलत्वात् भारो भरः, ग्रासं भच्यं त्यक्त्वा दुर्ब्बलो जातो ज्ञायते । एतावत्यां विसंष्ठुलतायां निर्दयः कामः कान्तो वा वीजमपि तु द्वावेव । (C).

---

१३४ । १ भच (A), हउ (B). २ दुव्वर (A), दुव्वल (B & C). ३ तेज्ज (C). ४ खणे (A, B & C). ५ दीह (A). ६ ताव (A, B & C). ७ णिकुअ (B & C). ८ Dropt in (C). ९ १३१ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



तोटअ[1] छंद बिरीअ ठबिज्जसु[2]
मोदअ छंदअ[3] णाम करिज्जसु ।
चारि गणा भगणा सुपसिद्धउ[4]
पिंगल जंपइ[5] कित्तिहिं[6] लुद्धउ[7] ॥ १३५[8] ॥

१३४ । मौक्तिकदामोदाहरति । गरास — ग्रासं भोजनमिति यावत् तेज्जि — त्यक्ता कआ — कायः दुब्बरि — दुर्बलः भउ — जातः, खणे खणे[ण] — क्षणे क्षणे अच्छ — स्वच्छः णिसास — निश्वासः रोदनकालीनश्वास इत्यर्थः जाणिअ — ज्ञायते । तार — तारेण कुहु रव — कोकिलारावेण दुरंतः दुष्टः मरणादिजनकः अंतो यस्य तादृशो वसंतनामा ऋतुः, तस्मात् कि णिद्दअ काम — किं निर्दयः कामः कि णिद्दअ कंत — किं निर्दयः कांतः ॥ एतादृशेऽपि समये न आगतः सः प्रियो निर्दयः, प्राणेश्वरप्राणां मां ज्ञात्वा योऽतिदुःखं प्रयच्छति स कामो वा निर्दय इति कस्याश्चित्प्रोषितपतिकायाः सखीं प्रति वचनमेतत् । मौक्तिकदाम निवृत्तम् । (E).

१३४ । यथा । कायो जातो दुर्बलस्त्यक्तो ग्रासः क्षणे क्षणे जातोऽच्छनिश्वासः । कुहुरवतारदुरंतो वसंतः किं निर्दयः कामः किं निर्दयः कांतः ॥ (G).

१३५ । तोटकच्छन्दो विपरीतं स्थापय, मोदकच्छन्दो नाम

१३५ । १ तोलद्द (B & C), तोलअ (E). २ ठविज्ज (C). ३ छंदह (A). ४ सुपिसिद्धउ (B). ५ जप्पइ (B). ६ कित्ति (A), कित्तिअ (B & C). ७ लुद्धउ (B), णद्धउ (C). ८ १३१ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, गज्जउ[1] मेह कि अंबर[2] सावर[3]
फुल्लउ[4] णीव कि बुल्लउ[5] भम्मर[6]।
एक्कउ[7] जीअ पराहिण[8] अम्मह[9]
कीलउ[10] पाउस कीलउ[10] बम्मह[11] ॥ १३६[12] ॥
मोदकं।

कुरु। चत्वारो गणा भगणाः सुप्रसिद्धाः, पिङ्गलो जल्पति कीर्त्ति-लुब्धः॥ सगणचतुष्कात्मकतोटकस्य वैपरीत्येनापि चत्वार इति अत्र चत्वारो गणा भगणरूपाः स्थाप्याः, अन्तगुरुर्हि सगणः, तस्य वैपरीत्येन भगणः। (C).

१३५। अथ द्वादशाक्षरचरणस्य वृत्तस्यैकादशोत्तरपंचविंशत्शततमं २५११ भेदं मोदकनामकं वृत्तं लक्षयति, तोलेति। तोलअ छंद — तोटकच्छंदः विरीअ — विपरीतं ठविज्जसु — स्थापयस्व, अतएव चारि गणा — चत्वारो गणाः भअणा — भगणा आदिगुरुकाः गणा इति यावत् सुपसिद्धउ — सुप्रसिद्धा यत्र प्रतिचरणं पततीति शेषः, तस्य छंदह — छंदसः मोदअ — मोदकं नाम अभिधानं करिज्जसु — कुरुष्व इति कित्तिहि लुद्धउ — कीर्त्तिलुब्धः पिंगलः जंपइ — जल्पति॥ इदमत्र तत्त्वं, चतुर्भिर्गुर्वंतगणैस्तोटकच्छंदो भवति

१३६। १ गज्जहि (B). २ अंमर (A). ३ सामर (A, B & C). ४ फुल्लइ (B), फुल्लुउ (C). ५ भमाउ (A, B & C). ६ भामर (A). ७ एक्कल (A & B), एक्कण (C). ८ पराधिण (C). ९ अम्हह (C). १० कीलेउ (A & E), कीणउ (B). ११ ममह (C). १२ १२२ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



तद्विपरीतस्थापनेनादिगुरुकैश्चतुर्भिर्गणैर्मोदकं भवति । वक्रोक्तिस्तु पद्यपूरणायेति मंतव्यम् । (E).

१३५ । तोटेति ॥ तोटकच्छंदो विपरीतं स्थापय, मोदकं छंदो-नाम कुरुष्व । चत्वारो गणा भगणाः सुप्रसिद्धाः, पिंगलो जल्पति कीर्त्तिलुब्धकः ॥ चत्वारो भगणाः कार्य्या इत्यर्थः । (G).

१३६ । उदाहरति । गर्ज्जतु मेघः किमम्बरं श्यामलं फुल्लतु नीपः घूर्ण[तु] भ्रमरः । * * * पराधीन * * * क्रीडतु प्रावृट् क्रीडतु मन्मथः ॥ गर्जो मेघस्य वास्तु दुःखे न कोऽपि विशेषः, किमित्याक्षेपे, क्रीडत्विति, मम तु मरणं सिद्धमेवेति व्यज्यते । स्थानद्वये की णउ इति पाठे किं नयतु प्रावृट् किं नयतु मन्मथः इति वार्थः । (C).

१३६ । मोदकमुदाहरति । गज्जेति । मेह — मेघः गज्जउ — गर्ज्जतु, कि — किंवा अंबर — अंबरम् आकाशमिति यावत् सावर — श्यामलं भवत्विति शेषः, णीव — नीपः कदम्बः फुल्लउ — विकसतु, कि — किंवा भम्मर — भ्रमराः बुल्लउ — गुंजंतु । अम्मह — अस्माकं पराहिण — पराधीनमन्यायत्तमिति यावत् एक्कउ — एकमेव जीवं किंवा पाउस — प्रावृट् लेउ — गृह्णातु, किं वा वम्मह — मन्मथः लेउ — गृह्णातु ॥ अत्र लेउ इति एकारो ह्रस्वो-बोध्यः । वर्षागमेऽप्यनागतं विदेशिनं पतिं ज्ञात्वा अतिकामार्त्तायाः कस्याश्चित्प्रोषितभर्त्तृकायाः कांचित्प्रियसखीं प्रति वचनमेतत् । मोदकवृत्तं निवृत्तम् । (E).

१३६ । यथा । गर्जतु मेघः किमंबरं श्यामलं, विकसंतु नीपाः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



णगण णगण कइ[1] चउ गण[2]
सुकइ[3] कमलमुहि[4] फणि भण[5] ।
तरलणअणि सब कर[6] लहु
सब गुरु जबउ[7] णिबरि कहु[8] ॥ १३०[9] ॥

---

किं गुंजंतु भ्रमराः। एको जीवः पराधीनोऽस्माकं, किं गर्जतु पर्जन्यः, किं गर्जतु मन्मथः ॥ (G).

१३० । नगणं नगणम् इति चतुर्गुणं सुकविकमलरविः फणी भणति। तरलनयनी सर्व्वत्र सर्व्वलघु सगुरुरूपकं न निरूप्य कथय ॥ आदौ नगणस्ततो नगण एवंक्रमेण चत्वारो गणा इत्यर्थः। तरलनयनीति छन्दसो नाम, सर्व्वत्र त्रयोदशाक्षरादावपि, निरूप्य निर्णीय। (C).

१३० । अथ द्वादशाक्षरचरणस्य वृत्तस्यांतिमं भेदं तरलनयनानामकं वृत्तं लक्षयति, णगणेति। हे कमलमुखि णगण—प्रथमं नगणः सर्वलघ्वात्मको गणः पुनः नगणः स एव, एवंप्रकारेण चउ गण—चतुरः गणान् नगणचतुष्टयमित्यर्थः कइ—कला सब—सर्वान् द्वादशापि पादस्थान् वर्णान् लहु—लघून् कुरु, जबउ—यावंतः सब गुरु—सर्वगुरवो गुरुयुक्ता यावंतो द्वादशाक्षरभेदा-

---

१३०। १ कर (A, B & C). २ गुण (C). ३ सुकइ (E). ४ कमलरइ (A, B & C). ५ फण (B). ६ सर सव (A), सव सव (B & C). ७ सव गुरु जवण (A), सगुरु जवउ ण (B & C), सव गुरु जवउ (E). ८ णिरवि करऊ (A), णिरवि कऊ (B & C), णिवरि कह (E). ९ १२४ (A).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, कमल बअण तिणअण हर[१]
गिरि बर सअण[२] तिसुलधर।
ससहर[३] तिलअ पलअकर[४]
बितरउ[५] मह[६] अभिमत[७] बर॥ १३८[८]॥

तरलणअणि[९]।

---

इत्यर्थः तावंत इति शेषः णिबरि—निराकृत्य भिन्नीकृत्येति यावत् तरलणअणि—तरलनयना एतन्नामकं वृत्तमित्यर्थः कह—कथय इति सूकइ—सुकविः फणि—फणी पिंगलः भण—भणति॥ अत्र गुरुयुक्तयावद्वि[द]कथनं पद्यपूरणार्थमेवेति मंतव्यं, नगणचतुष्टयरचितचरणा तरलनयनेति निःकृष्टोऽर्थः। (E).

१३७। णगेति। नगणं नगणं कृत्वा चतुरो गणान् सुकविः कमलमुखि फणी भणति। तरलनयना सर्वान् कुरु लघून् सर्वगुरुं यावत् केवलं कथय॥ सर्वगुरुमगणमारभ्य नगणपर्यंतं भेदाः कथिता इत्यर्थः। तरलनयनेति छंदः। (G).

१३८। उदाहरति। कमलवदनस्त्रिलोचनो हरो गिरिवर-शयनस्त्रिशूलधरः। शशधरतिलकः प्रलयकरो वितरतु मह्यं अभिमतं वरम्॥ (C).

१३८। तरलनयनामुदाहरति, कमलेति। कमल बअण—

---

१३८। १ तिण हर (E). २ गिरिसञ्चण (A). ३ ससधर (F). ४ मञ्चण दम (A), पलकर (B), गल गरल (E & F). ५ वितरहि (A & C). ६ बङ्क (B). ७ ञभिमञ (C), ञहिमत (F). ८ १३५ (A). ९ तरलनयनी (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



णगण चामर गंधजुत्रा ठवे
चमर सल्ल[1]जुत्रा जइ संभवे ।
रगण[2] एक्क[3] पत्रंतहि लेक्खित्रा[4]
सुमुहि[5] सुंदरि पिंगल देक्खित्रा[6] ॥ १३९[7] ॥

---

कमलवदनः तिणत्र[ण]—त्रिनयनः गिरि वर सग्रण—गिरिवरशयनः तिसुलधर—त्रिशूलधरः । ससहर तिलत्र—शशधरतिलकः गल गरल—कंठस्थितविषः हर—हरः महादेवः मज्झ—मह्यं अभिमत बर—समीहितवरं वितरउ—वितरतु ॥ तरलनयना निवृत्ता । (E).

१३८ । यथा । कमलवदन त्रिनयन हर गिरिवरशयन त्रिशूलधर । शशधरतिलक गलगरल वितर ममाभिमतं वरं ॥ (G).

१३९ । नगण-चामर-गन्धयुगानि स्थितानि चामरं शल्ययुगं यत्र सम्भवति । रगण एकः पादान्ते लिख्यते शृणु सुन्दरी पिङ्गलेन दृष्टा ॥ चामरं गुरुः, गन्धः शैल[शल्य]श्च लघुः । (C).

१३९ । अथ द्वादशाक्षरचरणस्य वृत्तस्य चतुःषष्ट्युत्तरशतचतुष्टयाधिक-सहस्रद्वया[सहस्रा]त्मकं भेदं [१४६४] सुंदरीनामकं वृत्तं लक्षयति, णगणेति । हे सुमुखि यत्र पूर्वं णगण चामर गंधजुत्रा—नगणचामरगंधयुगानि नगणस्त्रिलघ्वात्मको गणः चामरम् एको-

---

१३९ । १ सेल्ल (A, B & C). २ रस गण (B). ३ एक (F). ४ देक्खिआ (A, B & C). ५ सुमुखि (B), सुणहि (C). ६ पेक्खिआ (A), लेक्खिआ (B). ७ १२६ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, बहइ[1] दक्खिण मारुअ[2] सीअला[3]
गवइ[4] पंचम कोमल कोइला ।
महुअरा[5] महु पाण बहू सरा[6]
भमइ[7] सुंदरि[8] माहव[9] संभवा[10] ॥ १४०[11] ॥
सुंदरी[12] ।

---

गुरुः गंधजुआ — गंधयुगं लघुद्वयमिति यावत् तानीत्यर्थः ठवे — स्थाप्यंते, ततः जइ — यदि चामरम् एको गुरुः सल्लजुआ — शल्ययुगं शल्यो लघुस्तद्द्वयमित्यर्थः संभवे — संभवति । पअंअ[त]हि — पादांते एक्क — एकः रगण — मध्यलघुर्गणः लेक्खिआ लिखितः सा पिंगलदर्शिता पिंगलेन उपदर्शितेति यावत् सुंदरी सुंदरीनामकं तद्वृत्तं पिंगलेनोपदिष्टमित्यर्थः ॥ तस्यैव ग्रंथांतरे द्रुतविलम्बिते-[तमि]ति नाम, अतएव द्रुतविलम्बितमाह नभौ भराविति लक्षणमपि तत्रैव कृतमिति । (E). [Vide Ghosha's Compendium, p. 75—Ed.]

१३९ । णगेति । नगणं चामरं गंधयुगं स्थाप्यं चामरं शल्ययुगं यदि संभवति । रगण एकः पादांते लेख्यः सुमुखि सुंदरी पिंगल-दृष्टा ॥ चामरो गुरुः, गंधशल्यौ लघू । (G).

---

१४० । १ वद्द (B), वहति (C). २ गारुअ (B), माहुअ (E). ३ सिअला (E). ४ रवइ (A & C). ५ वङ्कअरा (B). ६ मङ्गसवा (A, B & C). ७ तवइ (A), गवइ (B & C). ८ सुंदरि (E). ९ संभर (A), सवर (B), संभव (C), मावइ (F). १० माहवा (A, B & C), संभरा (F). १२ १२७ (A). ११ सुंदरि (B & C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



कणा[1] दुणा चामर[2] सल्ला[3] जुअला जं
बीहा[4] दीहा[5] गंधअ[6] जुग्गा पअला[7] तं[8] ।
अंते कंता[9] चामर[10] हारा सुहकाआ[11]
बाईसा मत्ता गुणजुत्ता भणु[12] माआ ॥ १४१[13] ॥

---

१४० । उदाहरति । वहति दक्षिणमारुतः शीतलः रौति पञ्चमं कोमलं कोकिलः । मधुकरो मधुपानमहोत्सवो गायति सुन्दरि संभूतो माधवः ॥ संस्मरेति पाठे माधवं कृष्णं संस्मर । (C).

१४० । सुंदरीमुदाहरति । काचित्सखी कलहांतरितां महामानवतीं कांचिन्नायिकामाह, वहईति । हे सुंदरि सर्वावयवरमणीये माहव संभवा — माधवो वसंतस्तत्रोत्पन्न इत्यर्थः सीअला — शीतः दक्खिण मारुअ — दक्षिणमारुतः वहइ — वाति, कोइला — कोकिलः पंचम कोमल — पंचमं कोमलं यथा स्यात्तथा गवइ — गायति । मञ्ज पाण वह्न सरा — मधुपानवह्नस्वरा मधु मकरंदस्तस्य पानेनातिगंभीरस्वरा इत्यर्थः मञ्जअरा — मधुकरा भ्रमराः भमइ — भ्रमंति ॥ अतस्त्वमपि मानं विहाय कांतमभिसरेत्याशयः । सुमुखी [सुंदरी] निवृत्ता । (E).

१४० । यथा । वहति दक्षिणमारुतः शीतलो गायति पंचमं

---

१४१ । १ कण (B). २ Dropt in (B). ३ सेल्ला (B & C). ४ बीआ (B & C). ४ and ५ transposed in (A). ६ गंध (A). ७ पलिच्चा (A). ८ जं (F). ९ कणा (A). १० चामरु (A). ११ सुहकाया (A & E). १२ भणू (E). १३ १३८ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



कोमलं कोकिलः। मधुकरा मधुपानबद्धस्वरा भ्रमंति सुंदरि माधवसंभवे वसंते ॥ (G).

१४१। अथ त्रयोदशाक्षरा। कर्णौ द्विगुणः चामरं शैल[शल्य]-युगं यत्र द्वौ दीर्घौ गन्धयुगं प्रकटं तत्। अन्ते कान्तौ चामर-हारौ शुभकरौ द्वाविंशतिमात्रा गुणयुक्ता * * *॥ कर्णौ द्विगुरुः तद्द्विगुणे गुरुचतुष्कं, चामरं दीर्घः हारस्च गुरुः, शैल्यं[शल्यं] गन्धस्च लघू, कान्तौ कमनीयौ, द्वाविंशतिमात्रा इति मिलितानां संग्रहः। (C).

१४१। अथ त्रयोदशाक्षरचरणस्य वृत्तस्य द्विनवत्युत्तरैकशतो-त्तराष्टसहस्रं ८१९२ भेदा भवंति, तत्र द्वा[त्रयः]त्रिंशोत्तरषोडश-[शत]तमं भेदं [१६३३] मायानामकं वृत्तं लक्षयति, कण्णेति। जं— यत्र पूर्वं कण्णा दुण्णा—कर्णद्वयं गुरुद्वयात्मकगणयुगमिति यावत्, ततः चामर—चामरं गुरुस्ततस्च सल्ला जुअला—शल्ययुगलं शल्यो-लघुस्तद्द्वयमित्यर्थः, ततोऽपि बीहा दीहा—द्वौ दीर्घौ गुरुद्वयमिति यावत्, ततस्च गंधअ जुग्गा—गंधयुगं गंधो लघुस्तद्द्वयमित्यर्थः, अंते लघुद्वयांते पादांते वा कंता—कांतौ चामर हारा—गुरु-द्वयमित्यर्थः, एते गणा इति शेषः पअला—प्रकटिताः, तं—तां सु[सु]हकाआ—शुभकायां बाईसा मत्ता—द्वाविंशतिमात्राकां गुणजुत्ता—गुणयुक्तां माआ—मायां भणू—कथय॥ केचित्तु शुभकायाः शुद्धशरीराः गुणजुत्ता—गुणयुक्ताः द्वाविंशतिर्मात्रास्च पतंतीति मात्राविशेषणतया पदद्वयं योजयंति। मात्राकथनं सुह-काआ गुणजुत्तेति च पदद्वयमत्र पादपूरणार्थमेवेति ध्येयम्। (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, ए अत्थीरा[1] देक्खु[2] शरीरा घरु[3] जाआ
बित्ता पुत्ता सोअर[4] मित्ता[5] सबु[6] माआ ।
काहे लागी बब्बर बेलाबसि[7] मुझ्झे[8]
एक्का[9] कित्ती किज्जहि[10] जुत्ती जइ सुझ्झे[11] ॥
१४२[12] ॥ माआ[13] ।

---

१४१ । अथ [अति]जगती त्रयोदशाक्षरा ॥ कर्णेति ॥ कर्णौ द्वौ चामरः शल्ययुगलं यत्र द्वौ दीर्घौ गंधयुग्मं प्रकटं ततः । अंते कांतौ चामरहारौ शुभकायां द्वाविंशतिमात्रां गुणयुक्तां भण मायां ॥ कर्णो द्विगुरुः, चामरो गुरुः, शल्यो लघुः, गंधो लघुः, हारो गुरुः, मायेति छंदोनाम । (G).

१४२ । उदाहरति । एतदस्थिरं पश्य शरीरं गृहं जायां वित्तं पुत्रं सोदरं मित्रं, सर्वं माया । किंनिमित्तं बर्ब्बर भ्रमसि एकां कीर्त्तिं कुरु युक्त्या यदि शुध्यसि ॥ (C).

१४२ । मायामुदाहरति । ए — एतत् शरीरा — शरीरं अत्थीरा — अस्थिरं देक्खु — पश्य, घरु जाआ बित्ता पुत्ता सोअर मित्ता — गृहजायावित्तपुत्रसोदरमित्राणि एतत्सर्वं माया मिथ्याभूतमित्यर्थः । अतः हे बब्बर — बर्वर काहे लागी — किमर्थं

---

१४२। १ अतथीरा (A). २ देक्ख (B & C). ३ वर (A), घर (B & C). ४ सोहर (F). ५ मित्त (E). ६ सबू (A). ७ वेल्लवावसि (A). ८ मुज्झे (B, C & F). ९ एका (B & C). १० किव्जिय (B), किज्जइ (C). ११ सुज्झ (B & C), सूझ्झे (E), सूज्झे (F). १२ १२९ (A). १३ माया (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



ठइ आइ लहुजुअ पाअ करीजे
गुरु सल्ल[1] जुआ भगणा जुअ दीजे[2] ।
पअ[3] अंतह[4] पाइ[5] गुरू[6] जुअ[7] किज्जे
सहि तारअ[8] छंदह[9] णाम[10] भणिज्जे[11] ॥ १४३[12] ।

मुझ्झे — विमुह्य बेल्लावसि — विलम्बयसि जइ सूझ्झे — यदि जानासि, तदा जुत्ती — युक्तां कित्ती — कीर्त्तिं किज्जहि — कुरु ॥ अतिसंसारासक्तं कुकर्म्मिणं कंचित्प्रति कस्यचिन्मित्रस्योपदेशवाक्यमेतत् । माया निवृत्ता । (E).

१४२ । यथा । एतदस्थिरं पश्य शरीरं गृहं जायां वित्तं पुत्रान् सुहृदो मित्राणि, सर्वं माया । किमर्थमेतदुद्दिश्य बर्ब्बर विलम्बयसि मुग्ध एका कीर्त्तिः क्रियतां युक्तो यदि जानासि ॥ [का]हे लागीत्युक्तार्थे देशी । (G).

१४३ । स्थापयित्वा आदौ लघुयुगं पादः क्रियते गुरुशैल्य-[शल्य]युगं भगणद्वयं दीयते । पदान्ते पादे गुरुयुगं क्रियते सखि तारकं छन्दो[नाम] भण्यते ॥ (C).

१४३ । अथ त्रयोदशाक्षरचरणस्य वृत्तस्य षट्पंचाशदुत्तरसप्तदशशततमं भेदं [१७५६] तारकनामकं वृत्तं लक्षयति, ठईति । यत्र

१४३ । १ सेल्ल (A, B & C). २ गुरु सेल्ल जुआ जे (A, B & C). ३ पुणु (B). ४ अंतहि (A, B & C). ५ पाय (A, B & C). ६ गुरु (A & E). ७ जुइ (B), जुया (C). ८ तारय (B). ९ छंदह (A). १० णाम (A). ११ भणीजे (A). १२ १४० (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, णव[1] मंजरि[2] लिज्जिअ[3] चूअह[4] गाछे[5]
परिफुल्लिअ केसु णआ[6] बण आछे[7] ।
जइ एत्थि[8] दिगंतर जाइहि[9] कंता
किअ[10] बम्मह[11] णत्थि[12] कि णत्थि[12] बसंता ॥
१४४[13] ॥ तारअ[14] ।

पाअ — पादे आइ — आदौ लहु जुअ — लघुद्वयं ठइ — स्थापयित्वा गुरु सल्ल जुआ — गुरु-शल्ययुगे करीजे — क्रियेते एको गुरुः लघुद्वयं च क्रियत इत्यर्थः, ततो भअणा जुअ — भगणो गुर्वादिर्गणस्तद्युगं दीजे — दीयते । पअ अंतह पाइ गुरु जुअ — पादांतःपातिगुरु-युगं किज्जे — क्रियते, सहि — हे सखि तस्य छंदह — छंदसः तारअ — तारकम् इति णाम — अभिधानं भणिज्जे — भण्यते ॥ सगणचतुष्टयोत्तरगुरुरचितचरणं तारकमिति फलितार्थः । (E).

१४३ । ठईति । स्थापयादौ लघुयुगं पादे क्रियते गुरुः शल्य-युग्मं दीयते । पादांतःपातिगुरुयुगं क्रियते सखि तारकं छंदसो-नाम भण्यते ॥ (G).

१४४ । उदाहरति । नवमञ्जरी सज्जिता चूतवृक्षे परिफुल्लिता

१४४ । १ ठवि (A), णवि (B & C). २ मज्जरि (C & E). ३ किज्जिअ (A), सज्जिअ (C). ४ चूअइ (B). ५ गाच्छे (B & C). ६ केसु लआ (A, B & C), केसू णवा (E & F). ७ आच्छे (B & C). ८ एतइ (A), इत्थि (B & C). ९ जाइह (B & C). १० कि (A), किणु (B & C). ११ मअह (C). १२ णत्थि (A). १३ १४१ (A). १४ तारका (A), तारक (B).



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



धआ तूर हारो[१] उणो[२] तूर हारेण
गुरू सद्द किज्जे अ एक्का तआरेण[३] ।
कईसा कला कंदु[४] जंपिज्ज णाएण
असी होइ चो[५] अग्गला सब्ब पाएण ॥ १४५[६] ॥

किंशुकलता वनकच्छे । यदि अत्र दिगन्तरं याति कांतः किं मन्मथो नास्ति किं नास्ति वसन्तः ॥ (C).

१४४ । तारकमुदाहरति, णवेति । चूअ गाछे — चूतवृक्षेण णव — नवा मंजरि — मंजरिः लिज्जिअ — गृहीता, केसू [सु] णआ वण — किंशुकनूतनवनं आछे सम्यक् यथा स्यात्तथा परिफुल्लिअ — परिपुष्पितं । जइ — यदि एत्थि — अत्र वसंतसमये इत्यर्थः कंता — कांतः दिगंतर — दिगंतरं जाइहि — यास्यति, तदा किअ — किं वम्मह — मन्मथः णत्थि — नास्ति, कि — किंवा नास्ति वसंतः ॥ कांतं देशांतरजिगमिषुं ज्ञात्वा विमनायमानां कांचिन्नायिकां [प्र]ति — यद्यस्मिन्नपि समये कान्तो गमिष्यति तदा तस्य निवारकः कामः वसंतो वा नास्ति किंतु विद्यत एवेति त्वं मा विषीदेति गूढाभिप्रायायाः कस्याश्चित् सख्या वाक्यमेतत् । तारकं निवृत्तम् । (E).

१४४ । यथा । नवा मंजरी गृहीता चूतवृक्षेण परिपुष्पितं किंशुकानां नवं वनमस्ति । यद्यत्र दिगंतरं यास्यति कांतः किं मन्मथो नास्ति किं नास्ति वसंतः ॥ (G).

---

१४५ । १ हारा (A, B & C). २ पुणो (A, B & C). ३ गुरू काहला कण एक्केण पाएण (A), गुरू काहला कण एक्का लआरेण (B & C). ४ कंदु (A), कन्द (B & C). ५ चउ (A & E), चो (F). ६ १४२ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१४५। ध्वजस्तूर्य्यं हारः पुनस्तूर्य्यं हारेण गुरुः काहलः कर्णः एकलकारेण। कवीशेन कला कन्दो जल्प्यते नागेन अशीतिर्भवति चतुरग्रा सर्व्वपादेन॥ केचित्तु कईसा कला एकविंशतिः कलाः अर्थात् पादे इत्यर्थमाहुः। ध्वज आदिलघुस्त्रिकलः, तूर्य्यम् आदि-गुरुत्रिकलं, हारो गुरुः, काहलो लघुः, कर्णो द्विगुरुः, लकारो-लघुः—भवन्ति मात्रा इति शेषः। (C).

१४५। अथ त्रयोदशाक्षरचरणवृत्तस्य द्व्यशीत्युत्तरषट्शता-धिकचतुःसहस्रतमं ४६८२ भेदं कंदनामकं वृत्तं लक्षयति, धआ इति। यत्र पूर्वं धआ—ध्वजो लघ्वादिस्त्रिकल इति यावत् ततः तूर—तूर्य्यं गुर्वादिस्त्रिकल इति यावत् हारो—गुरुः उणो—पुनः हारेण—गुरुणा सह तूर—तूर्य्यं गुर्वादिस्त्रिकलः पुरःस्थित-गुरुर्गुर्वादिस्त्रिकल इति यावत् अ—पुनः एक्का तआरेण—एक-तकारेण लब्धं तगणेनेति यावत् गुरू—गुरुः सद्द—शब्दो लघुः पुरस्थिततगणो गुरुर्लघुश्चेति यावत् किज्जे—क्रियते, इदं च क्रियापदं यथायथं योज्यं। यत्र च सब्ब पाएण—सर्वपादेन पाद-चतुष्टयेनेति यावत् चउ अग्गला—चतुरधिका असी—अशीतिः कला—मात्राः होइ—भवंति, तत् कईसा—कवीशेन णाएण—नागेन पिंगलेन जंपिज्ज—जल्पितं कंदु—कंदः॥ तत्कंदनामकं वृत्तमित्यर्थः। अत्र मात्राकथनं पद्यपूरणार्थमिति ध्येयं। गुरु-[लघू]त्तरयगणचतुष्टयेन कंद इति फलितार्थः। (E).

१४५। धआ इति। ध्वजस्तूर्यं हारः पुनस्तूर्यं हारेण सहेति शेषः गुरुशब्दे कुरुते एकतकारेण। कवीशेन कलाः कंदुकं जल्प्यते

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



देइ[१] भुअंगम अंत लहु[२] तेरह बस्स पमाण ।
चउरासी चउ पाअ कल कंद छंदु बर जाण ॥
१४६[३] ॥ दोहा ।

जहा, ण रे कंस जाणेहि[१] हो[२] एक[३] बाला इ[४]
मुहे[५] देवई[६] पुत्त तो बंस कालाइ[७] ।
तहा गेण्ह[८] कंसो जणाणंद कंदेण
जहा हंति[९] दिठ्ठो[१०] णिआ णारि बिंदेण[११] ॥
१४७[१२] ॥ कंदः ।

नागेनाशीतिर्भवति चतुरधिका सर्वपादेन ॥ ध्वजो लघ्वादिस्त्रिकलस्तद्वयं गुरुलघू, शल्यो लघुः, तकारस्तगणः । (G).

१४७ । न रे कंस जानीहि अहमेको बाल इति भवामि दैवकीपुत्रस्त्वद्वंशकालः । तथा गृहीतः कंसो जनानन्दकन्देन यथा हेति दृष्टो निजनारीवृन्देन ॥ हा इति शब्दं कृत्वेति शेषः । (C).

१४७ । कंदमुदाहरति, ण रे इति । रे कंस तो बंस कालाइ — त्वद्वंशकालः देवई पुत्त — देवकीपुत्रः एक्क — एकः अद्वितीय इति यावत् बाला — बालकः हो — भवामि इति मुहे — मां ण जाणेहि — न जानासि । इत्युक्तेति शेषः जणाणंद कंदेण — सकल-

१४६ । १ देहि (B). २ लहू (C). ३ This śloka is found in MSS. (B & C), but not in the others.—Ed.

१४७ । १ जाणेश्री (B), जाणेऊ (C). २ हउ (A), हइ (B), हौ (F). ३ एक्क (A, B & C). ४ बाला (A). ५ हज (A & C), ह (B). ६ देवइ (E & F). ७ काला (A). ८ गेल्ह (A, B & C), गण्हु (E). ९ हाकि (B), हत्थि (C). १० दिट्ठो (B & C). ११ दृन्देण (E). १२ १४२ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



चामर पढमहि पाप गणो[1] धुत्र[2]
सल्ल चरण गण ठावहि[3] तं जुत्र[4]।
सोलह[5] कलत्र पए पत्र[6] जाणित्र
पिंगल पभणइ[7] पंकत्र[8] बालित्र[9] ॥ १४८[10] ॥

जीवानंदहेतुना श्रीकृष्णेनेत्यर्थः तथा कंसो—कंसः गहिऊ—गृहीतः यथा णित्रा णारि बिंदेण—निजनारीवृंदेन हंति—हतः दिट्ठ—दृष्टः॥ कंदो निवृत्तः। (E).

१४७। यथा। न भो कंस जानासि भवामि एको बालो-मुख्यो देवकीपुत्रस्त्वदंशकालः। तथा गृहीतः कंसो जनानंदकंदेन यथा हमिति दृष्टो निजनारीवृंदेन॥ (G).

१४८। चामरं प्रथमं पापगणो[णं] ध्रुवं शल्यं चरणं स्थापय तद्युगं। षोडशकलाः पदे पदे ज्ञात्वा पिंगलः प्रभणति पङ्कजावलीं॥ चामरं गुरुः, पापगणः सर्व्वलघुः पञ्चकलः, ध्रुवो निश्चितः, शल्यं लघुः, चरण आदिगुरुस्त्रतुष्कलस्तद्युगं तद्द्वयं स्थापयेत्यर्थः। (C).

१४८। अथ त्रयोदशाक्षरचरणस्य वृत्तस्यैकोनचत्वारिंशोत्तर-[सप्त]सहस्रतमं ७०३९ भेदं पंकावलीनामकं वृत्तं लक्षयति, चाम-रेति। पढमहि—प्रथमं चामर—चामरं गुरुं ततः धुव—[ध्रुवं]

१४८। १ गणा (E & F). २ धुव (F). ३ ठाविश्र (A), ठावह (C). ४ जुव (E & F). ५ सोडह (B), सोल (E). ६ पत्र पत्र (A), पत्रप्पत्र (E & F). ७ भणइ (B), पभणिश्र (E). ८ पंक (B). ९ Last half of the śloka dropt in (C). १० १४४ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, सो जण[1] जणमउ[2] सो[3] गुणमंतउ[4]
जे[5] कर पर उबआर[6] हसंतउ[7] ।
जे[5] पुण[8] पर उअआर[9] बिरुज्झ्झउ[10]
ताक[11] जणणि कि ण थक्कउ[12] बंझउ[13] ॥ १४९[14] ॥
पंकावली ।

---

निश्चितमिति यावत् पापगणं—पंचकलस्याष्टमं भेदं [Vide p. 22] सर्वलघ्वात्मकमिति यावत् ततः सल्ल—शल्यं लघुमित्यर्थः ततः चरण गण—चरणगणस्य आदिगुरोर्भगणस्येति यावत् जुब—युगं ठावहि—स्थापय। इदं च क्रियापदं यथायथं योज्यं। पअप्पअ—पादे पादे प्रतिचरणमित्यर्थः यत्रेति शेषः सोलह—षोडश कलअ—कलाश्च जाणिअ—ज्ञायंते, तं—तां पंकअबालिअ—पंकावलीं तत्पंकावलीनामकं वृत्तमित्यर्थः पिंगल—पिंगलः पभणइ—प्रभणति ॥ अत्र मात्राकथनं पद्यपूरणार्थमिति मंतव्यं। भगण-नगण-लघूत्तरजगणद्वय-रचितचरणा पंकावलीति निष्कृष्टोऽर्थः । (E).

१४८। चामेति। चामरं प्रथमं पापगणं ध्रुवं शल्यं चरणगणस्य

---

१४९। १ जग (A, B & C). २ जणमच्च (B), जणमेउ (E & F). ३ ए (A, B & C). ४ गुणमत्तह (A). ५ जो (B & C). ६ उअआर (A, B & C). ७ हसत्तह (A). ८ पुणु (A), उण (B & C). ९ उवआर (E & F). १० विरुज्झउ (C), बिरुज्झ्झइ (E), विरुज्झइ (F). ११ ताकि (A), तासु (E), तासु (F). १२ and १३ transposed in (E & F). १२ थाकउ (A), थक्कइ (C, E & F). १३ बंधउ (B & C), वज्झ्झइ (E & F). १४ १४५ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



स्थापय युगं । षोडशकलं पदे पदे जानीहि पिंगलः प्रभणति पंकावलीकं नाम छंदः ॥ चामरो गुरुः, पापगणः पंचलघुः, शल्यं लघुः, चरणो भगणः । (G).

१४८ । * * * [त]तः पापगणो ध्रुवं शल्यं चरणगणं प्रापय तं युगं । षोडशकलाः पदे प्रकाशिताः पिंगलः प्रभणति पंकवालीं ॥ प्रथमं चामरो गुरुस्ततः पापगणः पंचलघुरूपगणः ध्रुवं निश्चयेन शल्यो लघुश्चरणगणं भगणं तं भगणं युगं प्रापय भगणद्वयं स्थापयेत्यर्थः । षोडशकलाः पदे भवन्ति । पंकवाली छंदसो नाम । (H).

१४९ । उदाहरति । स जगति जायतां गुणवान् यः परोपकारं करोति सन्ततं । यः पुनः परोपकारे विरज्यते तस्य जननी किं न तिष्ठति बन्ध्या ॥ तिष्ठति भवतीत्यर्थः । (C).

१४९ । पंकावलीमुदाहरति, सो जणेति । सो — सः जण — जनः जणमेउ — जातः सजन्मेति यावत्, सः गुणमंतउ — गुणवान्, जे — यः हसंतउ — हसन् सन् पर उवआर — परोपकारं कर — करोति । जे — यः पुनः पर उवआर — परोपकारं विरुज्झइ — विरुणद्धि तासू — तस्य जणणि — जननी बंझ्झइ — बंध्यैव किं न थक्कइ — तिष्ठति ॥ व्यर्थमेव प्रसूयते इत्यर्थः । किंचित् स्वमित्रं प्रति कस्यचिदुपदेशवाक्यमेतत् । पंकावली निवृत्ता । (E).

१४९ । यथा । स जन उत्पद्यतां स गुणवानुदेतु यः करोति [परो]पकारं हसन् । यः पुनः परोपकारं विरुध्यते, तस्य जननी किं न बंध्यैव तिष्ठति ॥ (G).

१४९ । उदाहरणमाह । सो जग इत्यादि । स जगति जन्म

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



कण्णो पइज्ज[1] पढमे[2] जअणो[3] अ बीए[4]
अंते तुरंग सगणो[5] जअ[6] जत्थ[7] पाए ।
उत्ता बसंततिलआ फणिणा[8] उकिठ्ठा[9]
छेआ पठंति[10] सरसा[11] सुकइंद[12] दिठ्ठा[13] ॥ १५०[14] ।

---

गृह्णातु यः पुण्यवान् सति सामर्थ्ये करोति परोपकारं । ये पुनः परोपकारविरतास्तेषां जनन्यः किमिति न स्थिता वंध्याः ॥ (H).

१५० । अथ चतुर्दशाचरा । तत्र वसन्ततिलकं । कण्णो । कर्णः स्थाप्यते प्रथमं जगणो द्वितीये तृतीये च द्वौ सगणौ जगणश्च पादे । उक्तं वसन्ततिलकं फणिना उत्कृष्टं छेकाः पठन्ति सरसाः सुकवीन्द्रदृष्टाः ॥ तुरङ्गे सगणा इति पाठे तुरङ्गोऽन्तगुरुश्चतुष्कलः । छेका विदग्धाः । (C).

१५० । अथ चतुर्दशाचरचरणस्य वृत्तस्य चतुरशीत्यधिकशतत्रयोत्तरषोडशसहस्रं भेदा भवंति, तत्रैक[त्र त्रयः]त्रिंशोत्तरन[व]शताधिकद्विसहस्रतमं भेदं [२९३३] वसंततिलकानामकं वृत्तं लक्षयति, कण्णविति। पढमे — प्रथमे स्थाने कण्णो — कर्णः गुरुद्वयात्मको-गण इति यावत् अ — च पुनः बीए — द्वितीये स्थाने जअणो —

---

१५० । १ ठविज्ज (E). २ पढमो (A). ३ जगणो (A & C). ४ ठविज्जए (A). ५ सगणा (B & C). ६ सश्च (A), जग (B), पश्च (E). ७ जच्छ (A), तत्थ (B & C). ८ फणिराउ (A). ९ दिठ्ठा (A), उकिट्टा (B & C). १० पढन्ति (A & C). ११ परसा (F). १२ सकइंद (A). १३ दिट्टा (B & C). १४ १४६ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जगणो मध्यगुरुगणः, अंते — जगणांते तुरंग — तुरंगश्चतुर्मात्रकः सगण इति यावत्, ततश्च सगणो — पुनः सगण एवं गुर्वंत इति यावत् । क्वचिच्च दुश्मि सगणो इति पाठस्तत्र दु[अ]म्मि सगणो — सगणद्वयमपि गुर्वंतगणद्वयमिति यावदित्यर्थः कर्त्तव्यः, अवहट्ट-भाषायां पूर्वापरव्यत्यासे दोषाभावात् अ — च पुनः पाअ गणो — लघ्वादिर्गण इत्यर्थः जत्थ — यत्र पाए — पादे ठविज्ज — स्थाप्यत-इति यथायथं योज्यताम् । फणिणा — पिंगलेन उत्ता — उक्तां उक्किट्ठा — उत्कृष्टां सु कइंद दिट्ठा — सुतरां कवींद्रदृष्टां सरसा — प्रेमाविष्टाः छेआ — विदग्धाः वसंततिलआ — वसंततिलकां पठंति ॥ तगण-भगण-गुरुद्वयोत्तरय[ज]गणद्वय-रचितचरणा वसंततिलकेति फलितार्थः । (E).

१५० । अथ चतुर्द्दशाक्षरा शक्करी । कणो इति । कर्णः पतितः प्रथमे जगणश्च द्वितीये अंते तुरंगः सगणो यस्य यत्र पादे । उक्तां वसंततिलकां फणिनोत्कृष्टां छेकाः पठंति सरसाः सुकवींद्रदृष्टां ॥ कर्णो द्विगुरुः, तुरंगश्चतुर्मात्रकः सगणः, यः यगणः । (G).

१५० । चतुर्द्दशाक्षरप्रस्तारस्य कानिचिच्छंदांसि वदति । कणो इत्यादि । कर्णः प्राप्तः प्रथमः जगणो द्वितीयेऽन्ते तुरङ्गसगणौ यस्य तत्र पादे । उक्ता वसन्ततिलका फणिना उत्कृष्टा छेकाः पठन्ति सरसाः सुकवीन्द्रदृष्टा ॥ कर्णो गुरुयुग्मगणः प्राप्तः प्रथमो-जगणो द्वितीये अन्ते एतदन्ते तुरगसगणौ, यद्यपि गअ रह तुरंग पाइक्क एऊ णामेण जाण चउमत्ता [Vide श्लोक १०, p. 36.—Ed.] इत्यनेन तथाप्यत्र सगणसाहचर्य्यात्तुरंगः सगणः, सगणद्वयानंतरं



CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, जे तीअ तिक्ख[१] चल चक्खु ति हाब दिठ्ठा[२]
ते काम चंद महु पंचम[३] मारणिज्जा[४]।
जेसुं उणो णिबडिदा[५] सअला बि दिठ्ठी
चिट्ठंति[६] ते तिल अलंजलि[७] दाण जोग्गा ॥१५१[८]॥
वसंततिलका[९]।

यगण आदिलघुः पञ्चकलगणः, छेका विदग्धाः। चरणान्तलघुनापि वसन्ततिलका भवति। तदुक्तं छंदःपारिजाते। उक्ता वसन्ततिलका तभजा जगौ गः सिंहोन्नतेयमुदिता मुनिकाश्यपेन। अन्तस्थितेन लघुनापि विनोदभूमिरेषा भवेल्ललितबंधनिबंधनेन ॥ अस्य छंदसो नानामुनिभिर्नानानामान्युक्तानि। तथा छंदःसिद्धांतभास्करे। उक्ता वसंततिलका तभजा जगौ गः सिंहोन्नतेय[मुदिता] मुनिकाश्यपेन। उद्धर्षिणीति मुनिसैतवसम्मतेयं गार्ग्येण सैव गदिता मधुमाधवीति ॥ (H).

१५१। ये तस्यास्तीक्ष्णचलचक्षुस्त्रिभागदृष्टास्ते कामचन्द्रमधुपञ्चममारणीयाः। येषु पुनर्निपतिता सकलापि दृष्टिर्वर्त्तन्ते ते तिलजलाञ्जलिदानयोग्याः। तिलेत्यादिना मृता एव प्रत्याय्यन्ते। (C).

१५१। १ तित्थ (B), तिक्ख (C). २ तिहाष दिट्ठा (A), ति भाष दिट्ठा (B), ति हाष दिट्ठा (C). ३ Dropt in (B). ४ मारणीव्वा (A). ५ णिविडिषा (E), णिबडिषा (F). ६ वट्टंति (A, B & C). ७ जलाञ्जलि (C), जलंजली (E). ८ १४० (A). ९ वसन्ततिलषा (B & C).

CC-0. In Public Domain. Funding by IKS-MoE

संभणिअ[1] चरण गण पलिअ मुहो[2]
संठविअ पुणवि[3] दिअवर जुअलो ।
जं[4] करअल गण[5] पअ[6] पअ मुणिओ
चक्कपअ पभण[7] फणिबइ[8] भणिओ ॥ १५२[9] ॥

१५१ । वसंततिलकामुदाहरति । [जे —]ये लोकाः तीक्ष्ण—तस्याः तिक्ख चल चक्खु ति हाव दिट्ठा — तीक्ष्णचलचक्षुस्त्रिभागदृष्टाः, ते काम चंद मह पंचम मारणिज्जा – कामचंद्रमधुपंचममारणीया जाता इति शेषः । जेसुं — येषु उणो — पुनः तस्याः [स]अला वि दिट्ठी — सकलापि दृष्टिः णिविडिआ — निपतिता, ते तिल जलांजलि दाण जोग्गा — तिलजलांजलिदानयोग्याः चिट्ठंति — तिष्ठंति ॥ कर्पूरमंजरीनाटकस्थं कर्पूरमंजरीवर्णनपरं विदूषकं प्रति राज्ञो वाक्यमेतत् । वसंततिलका निवृत्ता । (E).

१५१ । यथा । ये तया तीक्ष्णचलचक्षुस्त्रिभागदृष्टास्ते कामचंद्रमधुपंचममारणीयाः । येषु पुनर्निपतिता सकलापि दृष्टिस्तिष्ठंति ते तिलजलांजलिदानयोग्याः ॥ (G).

१५१ । उदाहरणमाह । जे तीक्ष्ण इत्यादि । ये तस्यास्तीक्ष्णचलचक्षुस्त्रिभागदृष्टास्ते कामचंद्रमधुपञ्चममारणीयाः । येषु पुन-

१५२ । १ संतभणिअ (A), संतंभणिअ (B). २ पअलिअ मूहो (B). ३ पुणुवि (B & C). ४ तं (A, B & C). ५ करअ सगण (A), करतल गण (E). ६ पइ (B & C). ७ चक्क पभण (A), चक्कपअइ भणु (B & C), चक्कपअअ भणु (F). ८ फणिवइ चर (A). ९ १४८ (A).

Digitized by eGangotri and Sarayu Trust.



र्न्निपतिता सकलापि दृष्टिर्वर्तन्ते ते तिलजलाञ्जलिदानयोग्याः ॥ कर्प्पूरमञ्जरीनाटके राज्ञो वचनम् । (H).

१५२ । सम्भालय चरणगणः पतितो मुखे संस्थाप्य पुनर्द्विजवरयुगलं । तं करतलगणं पदे स्थापयित्वा ज्ञातः चक्रपदो भण्यतां फणिपतिभणितः ॥ चरण आदिगुरुश्चतुष्कलः, करतलगणोऽन्तगुरुश्चतुष्कलः । (C).

१५२ । अथ चतुर्दशाक्षरचरणस्य वृत्तस्यैक[नवत्युत्तरैक]शताधिकाष्टसहस्रतमं ८१९१ भेदं चक्रपदनामकं वृत्तं लक्षयति, संभणित्र इति । मुहो — मुखे प्रथममिति यावत् पलित्र — पतितं चरणगणं गुर्वादिभगणमित्यर्थः संभणित्र — संभण्य, पुणवि — पुनरपि दिग्रवर जुग्रलो — द्विजवरजुगलं चतुर्लघ्वात्मकगणद्वयमिति यावत् संठविग्र — संस्थाप्य । जं — यत्र पत्र पत्र — पादे पादे प्रतिचरणमिति यावत् करअल गण — करतलगणः गुर्वंतः सगण इति यावत् मुणिओ — ज्ञातः, तत् फणिवइ भणिओ — फणिपतिभणितं चक्कपत्र — चक्रपद प्रभण ॥ (E).

१५२ । संभेति । संभण्य चरणगणं पतितं मुखे संस्थाप्य पुनरपि द्विजवरयुगलं । यत्र करतलगणः पदे पदे च ज्ञातः चक्रपदं भण फणिपतिभणितं ॥ चरणो गुर्वादिर्भगणः, द्विजवरश्चतुर्लघुः, करतलः सगणः । (G).

१५२ । संभणिअ इत्यादि । संभणितश्चरणगणः पतितो मुखे संस्थापय पुनरपि द्विजवरयुगलं । ततः करतलगणः पदतले ज्ञायते चक्रपदं शृणु फणिपतिभणितं ॥ चरणगणो भगणः, मुखे आदौ,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, खंजण जुअल णअण बर उपमा
चारु कणअ लइ भुअजुअ सुसमा[१] ।
फुल्ल कमल मुहि गअ[२]बर गमणी
कस्स[३] सुकिअ[४] फल बिहि[५] गठु[६] तरुणी[७] ॥ १५३[८] ॥

चक्रपदम्[९] ।

---

पतितः सम्भणितः, पुनरपि द्विजवरयुगलं संस्थापय, द्विजवरश्चतुर्लघुगणस्तयोर्युगलमष्ट लघव इत्यर्थः, ततः करतलगणः सगणः पदतले चरणे ज्ञातः, तलशब्दः स्वरूपवाचकः, फणिपतिभणितं त्वं शृणु इत्यन्वयः । (H).

१५३ । उदाहरति । खञ्जनयुगलं नयनवरस्य उपमा चारु कनकं नीता भुजयुगस्य सुषमा । फुल्लकमलमुखी गजवरगमनी कस्य सुकृतस्य फलं धात्रा घटिता रमणी ॥ (C).

१५३ । चक्रपदमुदाहरति, खंजणेति । अत्रावहट्टभाषायां पूर्वनिपातानियमात् उपमा शब्दस्य पूर्वनिपातं कृत्वा योजनीयं, तथाच खंजनजु[यु]गलोपमनयनवरा खंजनयुगलस्य उपमा ययोः तादृशे अपि नयने ताभ्यां वरा रमणीयेत्यर्थः, चारु कणअ लद भुअजुअ सू[सु]समा — चारुकनकलताभुजयुगसुषमा चार्व्वी कनकलताया-इव भुजयुगस्य सुषमा यस्यास्तादृशीत्यर्थः, फुल्ल कमल मुहि —

---

१५३ । १ सूसमा (E), dropt in (F). २ Dropt in (B). ३ तुम्ह (A), तुं (B). ४ सुकिअ (E). ५ विछ (A). ६ गढ (F). ७ रमणी (A, B & C). ८ १४९ (A). ९ चक्रपाद (C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



कर पंच पसिद्ध[1] बिलद्ध[2]बरं रअणं[3]
पभणंति[4] मणोहर छंदबरं रअणं ।
गुरु पंच दहा लहु एरिसिअं[5] रइअं[6]
भमराबलि छंद पसिद्ध किअं ठबिअं[7] ॥ १५४[8] ॥

---

फुल्लकमलमुखी गअवर गमणी — गजवरगमना रमणी ललना कस्स सु[सु]किअ फल — कस्य सुकृतफलेन विधिना गढु — सृष्टा ॥ एतादृशी कांता कान्तिभाविता कस्य पुण्येन ब्रह्मणेयं निर्मितेत्यर्थः । चक्रपदं निवृत्तं । (E).

१५३ । यथा । अवहट्टभाषायां पूर्वनिपातादिनियमाभावात् यथोचिता योजना कार्या सर्वत्रेति बोध्यं । खंजनयुगलनयनवरोपमा चारुकनकलताभुजयुगसुषमा । फुल्लकमलमुखी गजवरगमना कस्य सुकृतफलेन विधिना निर्मिता तरुणी ॥ (G).

१५३ । उदाहरणमाह, खंजण इत्यादि । खंजनयुगलनयनवरोपमा चारुकनकलताभुजयुगसुषमा । फुल्लकमलमुखी गजवरगमना कस्य सुकृतफलेन विधिना निर्मिता रमणी ॥ खंजनयुगलेन नयनवरयोरुपमा यस्याः सा, चारुकनकलतावद्भुजयुगस्य परमा शोभा यस्याः सा । चतुर्दशाक्षरप्रस्तारस्य चतुरधिकाशीतिशतत्रयं षोडशसहस्रं भेदास्तेषु भेदद्वयमुक्तं, शेषभेदाः स्वयं ज्ञेयाः । (H).

---

१५४ । १ सिद्ध (F). २ तिलद्ध (A & B), सुलद्ध (C). ३ वअणं (A). ४ पभणंत (A). ५ एरिसिए (A). ६ लविअं (A), लपिअं (B & C), dropt in (E). ७ ठइअं (E). ८ १५० (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



१५४। अथ पञ्चदशाक्षरा यथा। करपञ्चकं प्रसिद्धं सुलब्धवरं रत्नं प्रभणन्ति मनोहरच्छन्दोवरं रमणं। गुरवः पञ्च दश लघवः एतादृशं लब्धं भ्रम[रा]वलीच्छन्दः प्रसिद्धीकृतं स्थापितं ॥ करोऽन्तगुरुस्तुष्कलः। (C).

१५४। अथ पंचदशाक्षरचरणस्याष्टषष्ट्युत्तरसप्तशताधिकद्वात्रिंश-त्सहस्रं ३२७६८ भेदा भवंति, तत्र त्रय[चतु]स्त्वारिंशोत्तरचतुर्दश-सहस्रतमं [१४०४४] भेदं भ्रमरावलीनामकं वृत्तं लक्षयति। यत्र पसिद्ध—प्रसिद्धैः पंच—पंचभिः कर—करैः गुर्वंतसगणैरिति यावत् विलद्ध वरं—विलद्ध[ब्ध]वरमतिरमणीयमिति यावत् रअणं —रत्नं किअं—कृतं, गुरु पंच—पंच गुरवः दहा लहू—दश लघवः पसिद्ध—प्रसिद्धास्तत् मणोहर—मनोहरं छंदवरं—छन्दः-श्रेष्ठं रअणं—रत्नं रत्नप्रायमिति यावत् रइअं—रचितं ठइअं—स्थापितं पिंगलेनेति भावः, एरिसिअं—एतादृशं भमराबलि छंद—भ्रमरावलीच्छन्दः पभणंति—प्रभणंति पण्डिता इति शेषः ॥ अत्र छन्दोविशेषणं भिन्नतया लघुगुरुकथनं च पद्यपूरणार्थमिति मंतव्यं, सगणपंचक-रचितचरणा भ्रमरावलीति फलितार्थः। (E).

१५४। अथ पंचदशाक्षरातिशर्करी ॥ करेति। करैः पंचभिः प्रसिद्धैरतिरमणीयरचनं प्रभणंति मनोहरं छंदोवरं रत्नं। गुरवः पंच दश लघवः ईदृशं रचितं भ्रमरावलिच्छंदः प्रसिद्धकृतं स्थापितं ॥ करः सगणः। (G).

१५४। पंचदशाक्षरप्रस्तारस्य कानिचिच्छंदांसि वदति। कर पंचेत्यादि। कराः पञ्च प्रसिद्धाः, तिलार्द्धेन वरं वचनं प्रभणन्ति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.



जहा, तुअ देव[1] दुरित्त गणा हरणा चरणा[2]
जइ पावउ[3] चंदकलाभरणा सरणा ।
परिपूजउ[4] तेज्जिअ[5] लोभमणा[6] भवणा[7]
सुख दे मह[8] सोक[9] विणास[10] मणा समणा ॥
१५५[11] ॥ भ्रमरावली ।

---

मनोहरं छंदोवरं रत्नं । गुरवः पंच दश लघव एतादृशं लपितं भ्रमरावलीच्छंदः प्रसिद्धं कृत्वा स्थापितं ॥ कराः सगणाः पंच प्रसिद्धास्तिलार्द्धेन अतिशीघ्रतया उत्कृष्टं वचनं यस्य छंदस उच्चारण-मित्यर्थः, भ्रमरावलीति छंदः प्रभणन्ति । (H).

१५५ । उदाहरति । तव देव दुरितगणहरणौ चरणौ यदि प्राप्येते हे चन्द्रकलाभरण शरण । तदा पूज्येते त्यक्त्वा लोभमनो-भ्रमणं सुखं प्रेर्य्यते लोकविनाशमनाः शमनः ॥ लोभयुक्तस्य मनसो-भ्रमणं लोभमनोभ्रमणं, प्रेर्य्यतेऽवकीर्यते । (C).

१५५ । भ्रमरावलीमुदाहरति, तुअ देवेति । हे चन्द्रकला-भरण देव दुरित्त गणा हरणा — दुरितगणहरणौ तुअ — तव चरणौ जइ — यदि सरणा — शरणे पावउ — प्राप्नोमि, तदो[दा]

---

१५५ । १ तुह देह (A), तुद देव (C), तुह देव (F). २ Dropt in (E). ३ पावउ (A). ४ परिपूजउँ (A), परिपुज्जउ (C), परिपूज्जउ (F). ५ तेज्जिए (A), dropt in (B). ६ लोभवणा (B). ७ भमणा (A), dropt in (C & F). ८ सुह पेल्लेउ (A), सुख पेल्लिउ (B & C), सूख दे मह (E). ९ लोक (A & C), लो (B). १० Dropt in (B). ११ १५६ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Pariçista Parvan. (Text) Fasc. 1–5 @ /6/ each ... ... Rs. 1 14
Prākrita-Paingalam, Fasc. 1–5 @ /6/ each ... ... ... 1 14
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each ... ... 1 14
Ditto (English) Part II, Fasc. 1 ... ... ... 0 12
Prākrta Laksanam, (Text) Fasc. 1 ... ... ... ... 1 8
Parāçara Smrti, (Text Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–6 @ /6/ each ... ... ... ... 7 8
Parāçara, Institutes of (English ... ... ... ... 0 12
Prabandhacintāmani (English) Fasc. 1–2 @ /12/ each ... ... 1 8
*Sāma Vēda Samhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8. @ /6/ each Fasc. ... ... ... 12 6
Sāṅkhya Sūtra Vrtti, (Text) Fasc. 1–4 @ /6/ each ... ... 1 8
Ditto English) Fasc. 1–3 @ /12/ each ... ... 2
Suçruta Samhitā, (Eng. Fasc. 1 @ /12/ ... ... ... 0 12
*Taittereya Samhitā, (Text) Fasc. 14–45 @ /6/ each ... ... 12 0
Tāndya Brāhmana, (Text Fasc. 1–19 @ /6/ each ... ... 7 2
Tattva Cintāmani, (Text) Vol. I. Fasc. 1–9. Vol. II. Fasc. 1–10, Vol. III. Fasc. 1–2, Vol. IV. Fasc 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–12 @ /6/ each ... ... ... ... 14 10
Trikānda Mandanam, (Text) Fasc. 1–2 @ /6/ ... ... ... 0 12
Tul'si Sat'sai, (Text Fasc. 1–5 @ /6/ each ... ... .. 1 14
Upamita-bhava-prapañca-kathā (Text) Fasc. 1–3 @ /6/ each ... 1 2
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/ ... ... 4 8
Varāha Purāna, Text) Fasc. 1–14 @ /6/ each ... ... ... 5 4
Varsa Krya Kaumudi, Fasc. I ... ... ... ... 0 6
*Vāyu Purāna, Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each ... ... ... ... ... ... 4 8
Visnu Smrti, (Text Fasc. 1–2 @ /6/ each ... ... ... 0 12
Vivādaratnākara, Text) Fasc. 1–7 @ /6/ each ... ... ... 2 10
Vrhannāradiya Purāna, Text) Fasc. 1–6 @ /6/ ... ... 2 4
Vrhat Svayambhū Purāna, Fasc. 1–6 ... ... ... 2 4

*Tibetan Series.*

Pag-Sam Thi S'iñ, Fasc. 1–4 @ 1/ each ... ... 4 0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each ... ... ... ... 13 0
Rtogs brjod dpag hkhri S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5 @ 1/ each ... ... ... ... 10 0

*Arabic and Persian Series.*

'Ālamgirnāmah, with Index, (Text Fasc. 1–13 @ /6/ each... ... 4 14
Al-Muqaddasi English) Vol. I, Fasc. 1–2 @ /12/ ... ... 1 8
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each ... ... ... 22 0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each ... ... ... ... 29 12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each ... ... 37 0
Ditto English Fasc, 1–5 @ 1/ each ... ... ... 5 0
Arabic Bibliography, by Dr. A. Sprenger ... ... ... 0 6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each ... ... 7 2
Catalogue of Arabic Books and Manuscripts ... ... ... 1 0
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each ... ... 3 0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each ... ... ... ... ... 21 0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each ... ... 14 0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each ... ... ... ... ... 3 0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each ... ... 3 6
Ditto of Azādī, (Text) Fasc. 1–4 @ /6/ each ... ... 1 8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ... 0 12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each ... ... 4 8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each ... ... 1 2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each ... ... 38 4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1–10; Index to Vol. I, Fasc. 10–11; Index to Vol. III, Fasc. 11–12; Index to Vol. II, Fasc. 10–12 @ /6/ each ... ... 13 2
Maghazi of Wāqidi, (Text) Fasc. 1–5 @ /6/ each ... ... 1 14

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

| | | |
|---|---|---|
| Muntakhabu-t-Tawārīkh, (Text) Fasc. 1-15 @ /6/ each ... | Rs. 5 | 10 |
| Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-5 and Index; Vol. III, Fasc. 1 @ /12/ each ... ... | 12 | 0 |
| Muntakhabu-l-Lubāb, (Text) Fasc. 1-19 @ /6/ each ... ... | 7 | 2 |
| Ma'āsir-i-'Ālamgīrī, (Text), Fasc. 1-6 @ /6/ each ... ... | 2 | 4 |
| Nukhbatu-l-Fikr, (Text) Fasc. 1 ... ... ... ... | 0 | 6 |
| Nizāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each | 1 | 8 |
| Riyāzu-s-Salātīn, (Text) Fasc. 1-5 @ /6/ each ... ... ... | 1 | 14 |
| Tabaqāt-i-Nāsirī, (Text) Fasc. 1-5 @ /6/ each ... ... ... | 1 | 14 |
| Ditto (English) Fasc. 1-14 @ /12/ each ... ... | 10 | 8 |
| Ditto Index ... ... ... ... | 1 | 0 |
| Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni (Text) Fasc. 1-7 @ /6/ each... | 2 | 10 |
| Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1-6 @ /6/ each... | 2 | 4 |
| Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each ... ... | 3 | 0 |
| Wis o Rāmin, (Text) Fasc. 1-5 @ /6/ each ... ... ... | 1 | 14 |
| Zafarnāmah, Vol. I, Fasc. 1-9, Vol. II, Fasc. 1-8 @ /6/ each .. | 6 | 6 |
| Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1 ... ... ... ... | 0 | 12 |

## ASIATIC SOCIETY'S PUBLICATIONS.

| | | |
|---|---|---|
| 1. Asiatic Researches. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each ... ... ... | 50 | 0 |
| 2. Proceedings of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No. | | |
| 3 Journal of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members | | |
| *N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.* | | |
| 4. Centenary Review of the Researches of the Society from 1784-1883 ... | 3 | 0 |
| A sketch of the Turki language as spoken in Eastern Turkistan, by R. B. Shaw (Extra No., *J.A.S.B.*, 1878) ... ... | 4 | 0 |
| Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868) ... ... ... ... | 2 | 0 |
| Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*, 1875) ... ... ... ... | 4 | 0 |
| Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*, 1882) ... ... | 4 | 0 |
| 5. Anīs-ul-Musharrahīn ... ... ... ... ... | 3 | 0 |
| 6. Catalogue of Fossil Vertebrata ... ... ... ... | 3 | 0 |
| 7. Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion | 3 | 8 |
| 8. Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each... | 32 | 0 |
| 9. Jawāmlu-l-'ilm ir-riyāzī, 168 pages with 17 plates, 4to. Part I | 2 | 0 |
| 10. Khizānatu-l-'ilm ... ... ... ... ... | 4 | 0 |
| 11. Mahābhārata, Vols. III and IV, @ 20/ each ... ... | 40 | 0 |
| 12. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I-III, with 8 coloured Plates, 4to. @ 6/ each ... | 18 | 0 |
| 13. Sharaya-ool-Islām ... ... ... ... ... | 4 | 0 |
| 14. Tibetan Dictionary, by Csoma de Körös ... ... ... | 10 | 0 |
| 15. Ditto Grammar " " ... ... ... | 8 | 0 |
| 16. Kaçmīraçabdāmṛta, Parts I & II @ 1/8/ ... ... ... | 3 | 0 |
| 17. A descriptive catalogue of the paintings, statues, &c., in the rooms of the Asiatic Society of Bengal by C. R. Wilson... ... | 1 | 0 |
| 18. Memoir on maps illustrating the Ancient Geography of Kaśmīr by M. A. Stein Ph.D., Jl. Extra No. 2 of 1899 ... ... ... | 4 | 0 |

| | | |
|---|---|---|
| Notices of Sanskrit Manuscripts, Fasc. 1-29 @ 1/ each ... ... | 29 | 0 |
| Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... | 5 | 0 |

*N.B.*—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

**Books are supplied by V-P.P.** 18-1-1901.

CC-0. In Public Domain. Funding by IKS-MoE